कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M2364

कविकुलबुरू कालिदास संस्कृत विश्वविद्याालय, रामटेक

हस्तलिखित संग्रह

दाखल क M2364 विषय कार्तिक महिन्याचे महात्म्य

नाव कार्तिक माहात्म्य

लेखक/लिपीकार –

पृठ 50 काळ [✓ पूर्ण]/अपूर्ण

M2364

श्रीगणेशाय नमः ॥ ॥ सूत उवाच ॥ ॥ श्रियः पतिमथामंत्र्य गते देवर्षिसत्तमे ॥ ह
र्षोत्फुल्लाननासत्यावासुदेवंतदाब्रवीत ॥१॥ श्रीसत्योवाच ॥ ॥ धन्यास्मि कृ
तकृत्यास्मि सफलं जीवितं मम ॥ ममजन्मनिदानेन धन्यौ तौ पितरौ मम ॥२॥ यौ
मां त्रैलोक्यसुभगां जनयामासतुर्ध्रुवं ॥ षोडशस्त्रीसहस्राणां वल्लभाहं यत
स्तव ॥३॥ यस्मान्मया हि पुरुषः कल्पवृक्षसमन्वितः ॥ यथोक्तविधिना सम्य
क् नारदाय समर्पितः ॥४॥ यद्वार्तामपि जानंति भूमिसंस्था न जंतवः ॥ सोयं कल्प
द्रुमो गेहे मम तिष्ठति सांप्रतं ॥५॥ त्रैलोक्याधिपतेस्त्वाहं श्रीपतेरतिवल्लभा ॥
अतोहं प्रष्टुमिच्छामि किंचित्त्वां मधुसूदन ॥ यदि त्वं तत्प्रियकरः कथयस्व सवि

स्त्वरं ॥ श्रुत्वा तव पुनश्चाहं करिष्ये हि समास्मनः ॥ यथा कल्पं त्वया देव विधियुक्तास्यां न
कर्हिचित् ॥ सूत उवाच ॥ इति प्रियावचः श्रुत्वा स्मेरास्यः स बलानुजः ॥ ८ ॥ सत्या
करं करे धृत्वा गमन् कल्पतरोस्तलं ॥ निषिध्यानुचरं लोकं स विताम्तं प्रियान्वितः ॥
९ ॥ रहस्य सत्यामामंत्र्य प्रोवाच जगतां पतिः ॥ तत्प्रीतिपरितोषाढ्यलसत्पुल
कितांगकः ॥ १० ॥ श्रीकृष्ण उवाच ॥ न मे त्वत्तः प्रियतमा काचिदन्या नि
तंबिनी ॥ षोडशस्त्रीसहस्राणां प्रिये प्राणसमा ह्यसि ॥ ११ ॥ त्वदर्थं देवराजोत्र वि
रुद्धो देवतैः सह ॥ यत्त्वया प्रार्थितं कांते ह्यणु चापि महद्भवेत् ॥ १२ ॥ अदेयमपि
वा कार्यं अकथ्यमपि यत्पुनः ॥ तत्करोति कथं प्रश्नं कथयाम्नि ते प्रिये ॥ तत्र

पयेसर्वंपतेमनसिवर्त्तते॥ ॥सत्योवाच॥ ॥दानंव्रतंतपोवापिकिंतुसर्वंकृतंमया
येनाहंमर्त्यजामर्त्यभावातीताभवंकिल॥ तंवागार्द्धहरानित्यंनित्यंगरुडगामिनं॥
इंद्रादिदेवतावासमगमंपत्नयासह॥ ॥अतस्त्वांपरिपृच्छामिकिंकृतंतुमयाशुभं
॥१६॥ भवांतरेचकिंशीताकाचाहंकस्यकन्यका॥ ॥श्रीकृष्णउवाच॥ ॥शृणु
ष्वेकमनाःकांतेयथात्वंपूर्वजन्मनि॥ पुण्यंकृतवतीसर्वंव्रतंतत्कथयामिते॥ श्री
सीत्कृतयुगस्यांतेमायापुर्यांद्विजोत्तमः॥१८॥ आत्रेयोदेवशर्माख्योवेदवे
दांगपारगः॥ आतिथेयोग्निशुश्रूषासौरव्रतपरायणः॥१९॥ सूर्यमाराधयन्नि
त्यंसाक्षात्सूर्यइवापरः॥ तस्यातिवयसश्चासीन्नाम्नागुणवतीसुता॥२०
अपुत्रःसचसशिष्यायचंद्रनाम्नेददौसुतां॥ तमेवपुत्रवन्मेनेसचतंपितृव

द्वरौ ॥ तौ कदाचिद्वनं यातौ कुशेध्माहरणार्थिनौ ॥ हिमाद्रिपादोपवने चेरतुस्तावितस्ततः ॥
॥२२॥ धावंतं राक्षसं घोरं मायांतं पर्यपश्यतां ॥ भयविह्वलसर्वांगावसमर्थौ पलायितुं
तुं ॥२३॥ निहतौ रक्षसा तेन कृतां तसमनूपिणा ॥ तौ ततस्तेत्र प्रभावेण कर्मशीलवतय
पुनः ॥२४॥ वैकुंठभवनं नीतौ मरुतौ मर्त्यसमीपगैः ॥ यावज्जीवं तु यस्ताभ्यां सूर्यपूजादि
कं कृतं ॥२५॥ तेनाहं कर्मणा ताभ्यां सुप्रीतस्त्वाभवं किल ॥ शैवाः सौरागाणेशाश्चैवै
ष्णवाः शाक्तिपूजकाः ॥२६॥ मामेव प्राप्नुवंतीह वर्षौघः सागरं यथा ॥ एकोहं पंचधा
जातः क्रीडया नामभिः किल ॥ देवदत्तो यथा कश्चित्पुत्राद्याह्वाननामभिः ॥ ततस्त्वतौ
मरुद्वनाधिवासिनौ विमानयानौ रविवर्चसावुभौ ॥२८॥ मत्तुल्यरूपौ मम संनिधौ

नगौ दिव्यांगनाचंदनभोगभोगिनौ ॥२९॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये प्रथमो
ध्यायः॥ ॥श्रीकृष्णउवाच॥ ॥ततो गुणवती श्रुत्वा राक्षसान्निहतावुभौ ॥ पितृ
भर्तृजं दुःखार्त्ता करुणं चरुरोद सा ॥१॥ ॥गुणवत्युवाच॥ ॥हा नाथ हा पितस्त्वं क्व गते
स्त्वद्य मया विना ॥ बालाहं किं करोम्यद्य ह्यनाथा भवतो विना ॥२॥ को नु मामाश्वासिता
गेहे भोजनाच्छादनादिभिः ॥ अकिंचित्कुशलां स्नेहात्पालयिष्यति दुःखितां ॥३॥ हत
भाग्या हतसुखा हताशा हतजीविका ॥ शरणं कं प्रयाम्यद्य यो मे दुःखं प्रमार्जये
त् ॥४॥ क्व गच्छामि क्व तिष्ठामि किं कुर्वे च यतो द्युतां ॥ विधात्रा हा हतास्म्यद्य कथं जीवामि
बालिशा ॥५॥ ॥कृष्णउ॰॥ ॥एवं बहु विलप्याथ कुररीव भृशातुरा ॥ पपात
भूमौ विकला रंभा वातहता यथा ॥६॥ चिराद्याश्वास्य सा म्हयो व्यलपत्करुणं बहु।

निमग्नाशोकजैः सिंधौ दुःखितासमवर्त्तत ॥ ७ ॥ सा गृहोपस्करान्सर्वान् विक्रियाः शुभ
कर्म कृत् ॥ तयोश्चक्रे यथाशक्तिपारलौकांत दाक्रियां ॥ ८ ॥ तस्मिन्नेव पुरे चक्रे वासं प्रमि
तजीविनी ॥ विष्णुभक्तिरता शांता सत्यशौचादितत्परा ॥ ९ ॥ व्रतद्वयं तथा सम्यगाजन्म
मरणं कृतं ॥ एकादशीव्रतं सम्यक्कुलेवनं कार्त्तिकस्य च ॥ १० ॥ तद्वू [illegible] तद्वयं काते ममा
तीव प्रियंकरं ॥ भुक्तिमुक्तिप्रदं पुण्यं पुत्रसंततिदायकं ॥ ११ ॥ कार्त्तिके मासि येऽनि
त्यं तुलासंस्थे दिवाकरे ॥ प्रातः स्नास्यंति ते मुक्ता महापातकिनोऽपि ये ॥ १२ ॥ स्नानं जा
गरणं दीपं तुलसीवनपालनं ॥ कार्त्तिके ये प्रकुर्वंति ते नरा विष्णुमूर्त्तयः ॥ १३ ॥ संमार्ज
नं विष्णुगृहे स्वस्तिकादिविलेखनं ॥ विष्णुपूजां प्रकुर्वंति जीवन्मुक्तास्त्वते नराः ॥ १४
इत्थं दिनत्रयमपि कार्त्तिके ये प्रकुर्वते ॥ देवानामपि ते वांछ्या किं यैराजन्मतः कृतं ॥ १५ ॥

यंगुणावतीसम्यक्कृष्णस्यदैव्रतिनीह्यभूत्॥ नित्यंविष्णोःपरिकरेभक्त्यातत्परमानसा॥१६॥
कदाचित्साजराक्रांताकृशांगीज्वरपीडिता॥ स्नातुंगंगांगताकांतेकथंचिच्छनकैस्त
दा॥१७॥ यावज्जलांतरगताकंपतीशीतपीडिता॥ तावत्साविकलापश्यद्विमानंयो
तमंबरात्॥१८॥ शंखचक्रगदापद्महस्तैरासितमंतरात्॥ विष्णुरूपधरैःसम्यक्
वैनतेयध्वजांकितं॥ आरोहमनंविमानंतामप्सरोगणसेवितां॥ चामरैर्वीज्यमानांमे
वैकुंठमनयन्गणाः॥२०॥ अथसामद्विमानेस्थाज्वलदग्निशिखोपमा॥ कार्तिक
व्रतपुण्येनमत्सान्निध्यंगताभवत्॥२१॥ अथब्रह्मादिदेवानांयदाप्रार्थनयाभुवं॥ आ
गतोहंगणाःसर्वेयातास्तेपिमयासह॥२२॥ एतेहियादवाःसर्वेमद्गणाएवभामिनी॥
पिताते देवशर्माभूत्सत्राजिदभिधोह्ययं॥२३॥ यश्चंद्रनामासोक्रूरस्त्वंसागुणाव
तीशुभे॥ कार्तिकस्नानपुण्येनबहुमत्प्रीतिदायिनी॥ मद्वारियेत्वयासर्वंतुलसी

वाटिका कृता ॥ तस्मादयं कल्पवृक्षस्तवांगणागतः शुभे ॥ २५ ॥ कार्त्तिके दीपदानं च यत्त्वया
नुपुनाकृतं ॥ त्वद्देहगेहसंस्थेयं तस्माल्लक्ष्मीः स्थिराभवत् ॥ २६ ॥ यच्च व्रतादिकं सर्वं विष्णवे भर्
त्रार्पितं ॥ निवेदितवती तस्मान्मम भार्यात्वमागता ॥ २७ ॥ आजन्ममरणात्सर्वं कृतं यत्कार्त्ति
कव्रतं ॥ कदाचिदपि तेनत्वं मद्वियोगं न यास्यसि ॥ २८ ॥ एवं ये कार्त्तिके मासि नरा व्रतपराय
णाः ॥ मत्सांन्निध्यगतास्तेपि प्रीतिदात्वं यथा मम ॥ २९ ॥ यज्ञदानव्रततपः कारिणो मानवाः
खलु ॥ कार्त्तिकव्रतपुण्यस्य कलां नार्हंति षोडशीं ॥ ३० ॥ इत्थं निशम्य भुवनाधिपतेस्तदा
नीं ॥ प्राग्जन्मपुण्यभववैभवजातहर्षा ॥ विश्वेश्वरं त्रिभुवनं भुवनैकनाथं कृत्वा प्रणम्य
वचनं निजगाद सत्या ॥ ३१ ॥ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये द्वितीयोध्यायः ॥ ॥
॥ ॥ सत्यभामोवाच ॥ ॥ सर्वेपि कालावयवास्तव कालस्य रूपिणः ॥ समानास्तत्कथं

॥का०मा
॥५॥

मासेमासानांकार्त्तिकोवरः ॥१॥ एकादशीतिथीनां चमासानांकार्त्तिकप्रियः ॥ कथंवैदेव
देवेशकारणंकिंतुकथ्यतां ॥२॥ ॥श्रीकृष्णउ० ॥ ॥साधुपृष्टंत्वयाकांते शृणुष्वेकाग्र
मानसा ॥ पृथोर्वैन्यस्यसंवादंमहर्षेर्नारदस्यच ॥३॥ एवमेवपुरापृष्टो नारदः पृथुनातद
॥ उवाचकार्त्तिकाधिक्येकारणंसर्वविन्मुनिः ॥४॥ ॥नारदउवाच ॥ ॥शंखनामाभव
त्पूर्वमसुरः सागरात्मजः ॥ त्रिलोकीमथनेशश्वन्महाबलपराक्रमः ॥५॥ जित्वादेवांन्नि
राकृत्यस्वर्गलोकान्महासुरः ॥ इंद्रादिलोकपालानां अधिकारांत्समाहरत् ॥६॥ तद्भयाद्र
थतेदेवाः सुवर्णाद्रिगुहांगताः ॥ न्य[illegible]न्बहुवर्षाणि सावरोधाः सबांधवाः ॥७॥ सुवर्णा
द्रिगुहादुर्गसंस्थितास्त्रिदशा[illegible]या[illegible] ॥ तदृशानोबहुलुत्तेलदादैत्योव्यचारयत ॥ हृता
धिकारास्त्रिदशामयायद्यपिनिर्जिताः ॥ लक्ष्यंतेवैलघुत्वात्तेकरणीयंमयात्रकिं ॥

॥राम॥
॥५॥

आज्ञातं तु कथं देवा वेदमंत्रबलान्विताः ॥ तान्हरिष्ये ततः सर्वे बलहीना भवंति ते ॥ १० ॥ इ
ति मत्वा गतो दैत्यो विष्णुमालोक्य निद्रितं ॥ सत्यलोकाज्जहाराशु वेदान्सर्वान्स्वयंभुवः ॥ ११ ॥
नीतास्तु तेन ये वेदास्तद्भयास्ते निराक्रमन् ॥ तोयं निर्विविशुर्यज्ञमंत्रबीजसमन्विताः ॥ १२ ॥
तान्मार्गमाणः शंखोपि समुद्रांतरगोभ्रमत् ॥ न ददर्श तदा दैत्यः क्वचिदेकत्र संस्थितान् ॥ १३ ॥
अथ ब्रह्मा सुरैः सार्द्धं विष्णुं शरणमन्वयात् ॥ पूजोपकरणान्गृह्य वैकुंठभुवनं गतः ॥ १४ ॥
तत्र तस्य प्रबोधाय गीतवाद्यादिकाः क्रियाः ॥ चक्रुर्देवास्तथा चैव धूपदीपान्मुहुर्मुहुः ॥ १५ ॥
अथ प्रबुद्धो भगवान्तत्कृतिपरितोषितः ॥ ददर्श तान्सुरांस्तत्र सहस्रार्कसमद्युतिः ॥ १६ ॥
उपचारैः षोडशभिः संपूज्य त्रिदशास्तदा ॥ दंडवत्पतितान्भूमौ तानुवाचाथ माधवः ॥
१७ ॥ ॥ विष्णुरुवाच ॥ ॥ वरदोहं सुरगणा गीतवाद्यादिमंगलैः ॥ मनोभिलषितान्
कामान्सर्वानेवं ददामि वः ॥ १८ ॥ ईबस्यमु क्लैकादश्यां यावद्बुद्धिनी भवेत् ॥ निशांतु

॥का॰ १॥
॥६॥

पंशास्त्रेषेयं गीतवादित्रमंगलं॥ कुर्वंतु नित्यं मनुजा भवद्भिर्यथाकृतं॥ तदहं तत्फलं वास्या
तेज्ञाते वो सुखकारणं॥२१॥ वेदाः शंखहृताः सर्वे तिष्ठंत्युदकसंस्थिताः॥ तानानयाम्य
हं देवा हत्वा सागरनंदनं॥२२॥ अद्यप्रभृति वेदास्तु मंत्रबीजसमन्विताः॥ प्रस्वेदे, कार्ति
के मासि पवित्राण्यस्तु सर्वदा॥२३॥ मत्स्यरूपोहमपि च भवामि जलमध्यगः॥ भवंतोपि म
यासार्द्धमायांतु समुनीश्वराः॥२४॥ कार्त्तिके ये प्रकुर्वंति प्रातःस्नानं नरोत्तमाः॥ ते सर्वे य
ज्ञावभृथैः सुस्नाताः स्युर्न संशयः॥२५॥ ये कार्त्तिकव्रतं सम्यक् कुर्वंति मनुजास्सदा
॥ ते देहांते त्वया वत्स प्राप्या मद्भवनं सदा॥ विघ्नेभ्यो रक्षणं तेषां तथा कार्यं मम त्वया॥ दे
व्या त्वया च वरुण पुत्रपौत्रादिसंततिः॥२७॥ धनवृद्धिर्धनाध्यक्ष त्वया कार्या ममाज्ञ
या॥ मम रूपधरः साक्षाज्जीवन्मुक्तो न संशयः॥२८॥ आजन्ममरणं येन कृतमेतद्व्रतोत्त

॥राम॥
॥६॥

म
गरीतु
लेयरेप
स्यर्थः ॥

मे ॥ यथोक्तविधिना सम्यक्कृतमान्योभवतामपि ॥ एकादश्यां पतंश्चाहं भवद्भि प्रतिबोधित
॥ अतश्चैव तिथिर्मान्या सातीव प्रीतिदा मम ॥ २० ॥ व्रतद्वयं सम्यगिदं नरैः कृतं सान्निध्यक
मे न तथान्यदस्ति ॥ दानानि तीर्थानि तपांसि यज्ञाः स्वर्गोदकान्येव सुदासुरोत्तमाः ॥ २१ ॥ ॥
॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये तृतीयोध्यायः ॥ ॥ नारद उवाच ॥ ॥ इत्युक्त्वा भग
वान्विष्णुः शंफरीतुल्यरूपधृक् ॥ ख्यातपातांजलौ सत्यव्रतिनो विंध्यवासिनः ॥ १ ॥ स तं क
मंडलौ क्षिप्तं कूपयाक्षिप्तवान्मुनिः ॥ तावत्सममौ तत्र ततः कूपेन्यवेशयत ॥ २ ॥ तत्रापि न
ममौ तावत्कासारं आपयत्स तं ॥ एवं स सागरे क्षिप्तस्तत्र सोप्यक्षिवर्द्धन ॥ ३ ॥ ततो व
धोत्स तं शंखं विष्णुर्मत्स्यस्वरूपधृक् ॥ अथ तस्य करे धृत्वा बदरीवनमागमत् ॥ ४ ॥ त
त्राहूय सर्वर्षीस्सर्वानिदमाख्यापयद्विभुः ॥ ॥ विष्णुरुवाच ॥ ॥ जलांतर्द्ध विचरी सर्वा

॥का॰मा॰॥
॥७॥

स्तुस्तयं वेदान्प्रमागतान्॥५॥ तानानयध्वं त्वरितान्सरहस्यान्जलाशयात्॥ तावत्स्त्रय
गेतिष्ठामि देवतागणसंयुतः॥६॥ ॥नारद उवाच॥ ततस्ते सर्वमुनिभिस्तपोबलस
मन्वितैः॥ उद्धारिताः सबीजास्ते वेदा यज्ञाः समन्विताः॥७॥ तेषु यावन्ति तं लब्धं ता व
क्षितस्य तु॥ स स एवं ऋषिर्जातस्तदा प्रभृति पार्थिव॥८॥ अथ सर्वेपि संयम्य प्रया
गं मुनयोभ्ययुः॥ विप्रास्ते स विधात्रे ते लब्ध्वान्वेदान्यवेदयन्॥९॥ लब्ध्वान्वेदान्स्वय
ज्ञांस्तान्ब्रह्मा हर्षसमन्वितः॥१०॥ यज्ञांते देवगंधर्वयक्षपन्नगगुह्यकाः॥ निप
त्य दंडवद्भूमौ विज्ञप्तिं तस्य चक्रिरे॥११॥ ॥देवा ऊचुः॥ ॥देवदेव जगन्नाथ विज्ञप्तिं शृणु
नः प्रभो। हर्षकालोयमस्माकं तस्मात्त्वं वरदो भव॥१२॥ स्थानेस्मिन्द्रुहिणो वेदान्नष्टान्
प्राप्य पुनः स्वयं॥ यज्ञभागान्वयं प्राप्तास्त्वत्प्रसादाद्रमापते॥१३॥ स्थानमेतद्ततः श्रेष्ठं

नेन ३

॥८॥

पृथिव्यां पुण्यवर्द्धनं ॥ भुक्तिमुक्तिप्रदं वास्तु प्रसादाद्भवतां सदा ॥१४॥ कालोप्ययं महा
पुण्यो ब्रह्महत्यादिविशुद्धिकृत ॥ दतोक्षयकरश्चास्तु वैरमे तं ददस्व नः ॥१५॥ दिक्षुरु
वाच ॥ ॥ममाप्येतंमतं देवाः पद्मवद्भिरुदाहृतं ॥ ततस्तथास्त्विलभंते ते तद्रुत्सक्षेत्रमिति प्र
थां ॥१६॥ सूर्यवंशप्रभवो राजा गंगामत्रानयिष्यति ॥ सास्तर्यिकं न्ययावात्र कालिंघाये
गमेष्यति ॥१७॥ यूयं च सर्वे ब्रह्माद्या दिवसध्वं मया सह ॥ तीर्थराजेति विख्यातं ती
र्थमेतद्भविष्यति ॥१८॥ दानव्रतं तपो होमो जपपूजादिकाः क्रियाः ॥ अत्रानंतफलदाः
संतु मत्तोनिधिकरास्सदा ॥१९॥ ब्रह्महत्यादिपापानि सप्तजन्मार्जितान्यपि ॥ दर्श
नादस्य तीर्थस्य विनाशं यांतु दुःकृते ॥२०॥ देहत्यागं तथा धीराः कुर्वंतु मम संनिधौ
मत्तनुं प्रविशंत्येव न पुनर्जन्मिनो नराः ॥२१॥ पितृनुद्दिश्य ये श्राद्धं कुर्वंत्यत्र मम माय

तः॥ तेषांपि त्वगणाः सर्वे यांतु ते मम लोकतां॥ अन्यच्च कालो ह्येष महापुत्यः फलदोस्तु सदा
नृणां॥ दर्शनादेव पापानि यांतु सूर्यो यथा तमः॥२३॥ सलोकत्वं समीपत्वं सारूप्यत्वं त्रय
क्रमात्॥ नृणां दास्याम्यहं स्नाने माघे मकरगे रवौ॥२४॥ यूयं सुरेश्वराः सर्वे शृणुध्वं व
रदोस्मि वः॥ बदरीवनमध्येहं तत्र तिष्ठामि सर्वदा॥२५॥ अन्यत्र दशभिर्वर्षै [illegible]स्तप
सा दीयते फलं॥ न च त्रादिवसैकेन जीविभिः प्राप्यते सदा॥२६॥ स्नानं च दर्शनं त्वस्य
ये कुर्वंति नरोत्तमाः॥ जीवन्मुक्ताः सदा ते स्तु पापं नैवावतिष्ठते॥२७॥ ॥सूत उवाच
॥ ॥एवं देवान्देवदेवस्तदुक्त्वा तत्रैवांतर्धानमागात्सवेधाः॥ देवाः सर्वेप्यंगाकैर्युज
मामारं तद्ध्यानं शपुरिंद्रादयोन्ये॥२८॥ इमां च गाथां शृणुयान्नरोत्तमो यः श्रावयेद्वा
पि विशुद्धये ताः॥ स तीर्थराजं बदरीवनं च गत्वा फलं तत्समवाप्नुयाद्ध्रुवं॥२९॥ ॥इति

श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये चतुर्थोध्यायः ॥ ॥पृथुरुवाच॥ ॥महाफलं त्वया प्रोक्तम्मु
नेकार्त्तिकमाघयोः ॥ तयोः स्नानविधिं सम्यग्ब्रूहि यमानपि नारद ॥१॥ उद्यापनविधिं ब्रू
हि यथावत्तात तस्य मे ॥ ॥नारद उवाच॥ ॥त्वं विष्णोरंशजातोसि नात्यंतं विद्यते ते
वा ॥२॥ तत्तथापि वदन्सम्यङ्माहात्म्यं शृणु बाहुज ॥ ॥आश्विनस्य तु मासस्य सं शुक्लैका
दशी भवेत् ॥३॥ कार्त्तिकस्य व्रतीतानि तस्यां कुर्यादतंद्रितः ॥ रात्र्यां तुर्यांशशेषा
यां मुदतिष्ठेत्सदा व्रती ॥४॥ नैर्ऋतीं तां दिशं व्रजेद्ग्रामाद्बहिः सोदकभाजनः ॥ ग्रुपः
शिरास्तृकर्णास्तु ब्रह्मसूत्रा उदङ्मुखः ॥५॥ अंतर्धाय ततो भूमिं शिरः प्रावृत्य वा
ससा ॥ वक्त्रं निरुध्य यत्नेन ष्ठीवनोच्छ्वासवर्जितः ॥ कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षि
णामुखः ॥ गृहीतशिश्नश्चोत्थाय मृद्भिरुद्धृतमृत्तिकैः ॥६॥ गंधलेपक्षयकरं शौ

का॰मा॰
॥१९॥

वं कुर्याद्दंतं ड्रितः॥ एकालिंगे गुदे पंच चत्रिंर्द्धुवे दश सप्तोभयोः॥ द्विः सप्त पादयोः पंच गृहीणां
शौचमुच्यते॥९॥ एतद्वित्रिगुणं ज्ञेयं ब्रह्मचारीवनस्थयोः॥ यतेस्च तुर्गुणं रात्रौ तदर्द्धं
शौचमाचरेत्॥१०॥ तदर्द्धं मेपि मार्गस्थं स्त्रीशूद्राणां तदर्द्धकं॥ शौचकर्मविहीनस्य
मंत्राः फलदाः स्मृताः॥११॥ दंतजिह्वाविशुद्धिं च ततः कुर्यात्प्रयत्नतः॥ आयुर्बलं यशो व
र्चः प्रजाः पशुवसूनि च॥१२॥ ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते॥ इति मंत्रं स
मुच्चार्य गृह्णीयाद्द्वादशांगुलं॥१३॥ समिधं क्षीरवृक्षस्य क्षपापोहौ पर्णौ विना॥ प्र
तिपद्दर्शनवमीषष्ठीपर्वदिने तथा॥ चंद्रसूर्योपरागे च न कुर्याद्दंतधावनं॥ ततो विलि॥१४॥
शिवस्यापि गृहं गच्छेत्स्नानं नधीग॥१५॥ गंधपुष्पसतांबूलं गृहीत्वा भक्तितत्परः॥ तत्र
देवस्य पाद्यादीन् उपचारान्पृथक्पृथक्॥१६॥ कृत्वा स्तुत्वा पुनर्नत्वा कुर्यात्प्री त

दिमंगल्यै ॥ तालवेणुमृदंगादिध्वनियुक्तसनर्त्तकान् ॥१७॥ पुष्पैर्गीतैश्च तांबूलैर्गं
धकामपि वार्चयेत् ॥ देवालये गानपरा यतस्ते विष्णुमृतं यः ॥१८॥ तपांसि यज्ञदानानि
कृतानि च जगद्गुरोः ॥ तुष्टिदानि कलौ यस्माद्गीतागानं प्रशस्यते ॥२०॥ नाहं वसामि वै
कुंठे योगिनां हृदये रवौ ॥ मद्भक्ता यत्र गायंति तत्र तिष्ठामि नारद ॥२१॥ तेषां पूजादि
कं गंधपुष्पादि क्रियते नरैः ॥ तेन प्रीति परां यामि न तथा मत्प्रपूजनात ॥२२॥ मत्पुरा
णकथां श्रुत्वा मद्भक्तानां च गायनं ॥ गच्छंति ये नरा मूढास्ते मे द्वेष्या भवंति वै ॥२३॥ शिरीषेन
तगिरिजे मल्लिकाशाल्मलीभवैः ॥ अर्कजैः कर्णिकारैश्च विष्णुर्नार्च्यस्तथाक्षतैः ॥ गणे
शं तुलसीपत्रेण दुर्गां नैव च दूर्वया ॥ मुनिपुष्पैस्तथागस्त्यैर्लक्ष्मीकामो न चार्चयेत ॥
एभ्योन्यानि प्रशस्तानि स्रजं पोले दैवतु ॥ एवं पूजाविधिं कृत्वा देवदेवं क्षमापयेत ॥ मं

मालिनि
पुष्प
धोत्रा
कुड्यानि
पुष्प
हरिचि
षी

अगास्तिपुष्प २

का॰मा॰
॥१०॥

त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ ततः प्रदक्षि
णं कृत्वा दंडवत्प्रणिपत्य च ॥ पुनः क्षमाप्य देवेशं गायनाद्यं समापयेत् ॥ विष्णोः शिवस्या
पि च पूजनं ये कुर्वंति सम्यङ्कि· शिकार्त्तिकस्य ॥ निर्द्धूतपापः सहपूर्वजैस्ते प्रयांति वि
ष्णोर्भवनं मनुष्याः ॥ ॥ इतिश्रीपद्मपुराणे कार्त्तिकमाहात्म्ये पंचमोध्यायः ॥ ॥ नार
द उवाच ॥ ॥ घटिकाद्वयावशिष्टायां रात्र्यां गच्छेज्जलाशयं ॥ तिलदर्भाक्षतापुष्पगंध
द्यैः सहितः शुचिः ॥१॥ मानुषे देवखाते वा नद्यामप्रवसंगमे ॥ क्रमाद्दशगुणं स्नानं ती
र्थे नंतफलं स्मृतं ॥ विष्णुं स्मृत्वा ततः कुर्यात्संकल्पं तिथिपूर्वकं ॥ तीर्थादिदेवतादिभ्यः
क्रमादर्घ्याणि दापयेत् ॥ नमः कमलनाभाय नमस्ते जलशायिने ॥ नमस्तेस्तु हृषीके
श गृहाणार्घ्यं नमोस्तु ते ॥ वैकुंठे च प्रयागे च तथा बदरिकाश्रमे ॥ यतो विष्णुर्विचक्रं

॥१०॥

मैत्रेयानिदधेपदं ॥५॥ अतो देवा अवंतु नो यतो विष्णुर्विचक्रमे ॥ तैरेव सर्वतः सर्वैर्मुनिवे
दसमन्वितैः ॥ कार्तिकेहं करिष्यामि प्रातस्नानं जनार्दन ॥ प्रीत्यर्थं तव देवेश दामोदर म
या सह ॥ नित्यनैमित्तिके कृत्स्ने कार्तिके पापनाशने ॥ गृहाणार्घ्यं मया दत्तं दनुजेंद्रनिषूदन
द ॥ स्मृत्वा भागीरथीं विष्णुं शिवं सूर्यं जले विशेत् ॥ नाभिमात्रे ततस्तिष्ठन् व्रती स्नायाद्य
थाविधि ॥ तिलामलकचूर्णेन गृही स्नानं समाचरेत् ॥ विधवा स्त्री यतीनां च तुलसीमूल
मृत्स्नया ॥ सप्तमी दर्शनवमी द्वितीयाद्वा२दशीषु च ॥ त्रयोदश्यां तु न स्नायाद्धात्रीफल
तिलैः सह ॥ ११ ॥ आदौ कुर्यान्मलस्नानं मंत्रस्नानं तथापरं ॥ स्त्रीशूद्राणां न वेदोक्तैर्मंत्रैस्ते
षां पुराणजैः ॥ त्रिधात्तदेवकार्यार्थं यः पुरा भक्तिभावन ॥१२॥ स विष्णुः सर्वपापघ्नः पुना
तु कृपयात्र मां ॥ विष्णोराज्ञामनुप्राप्य कार्तिकव्रतकारकान् ॥ रक्षंति देवास्ते सर्वे मां पुनं

तुस वासवाः ॥ वेदमंत्राः सबीजास्तु सरहस्याः सबीजकाश्च कश्यपाद्याश्च मुनयो मां पु
नंतु सदैवते ॥ गंगाद्याः सरितः सर्वास्तीर्थानि जलदा नदाः ॥ सह सप्त सागराः सर्वे मां पुनं
तु जलाशयाः ॥ १६ ॥ पतिव्रतास्त्वदित्याद्याः यक्षाः सिद्धाः सपंनगाः ॥ औषध्यः पर्वताश्चा
पि मां पुनंतु त्रिलोकजाः ॥ १७ ॥ एभिस्नात्वा व्रती मंत्रैः हस्तन्यस्त पवित्रकः ॥ देवर्षीन्मान
वपितॄन् तर्पयेच्च यथाविधि ॥ यावंतः कार्तिके मासि वर्तते पितृतर्पणे ॥ तिलास्तत्संख्य
काब्दानि पितरः स्वर्गवासिनः ॥ १९ ॥ ततो जलाद्विनिष्क्रम्य शुचिवस्त्रधरो व्रती ॥ प्रा
तः कालादिकं कर्म समाप्यार्चेद्धरिं पुनः ॥ २० ॥ तीर्थादिदेवान् संस्मृत्य पुनरर्घ्यान्
प्रदापयेत् ॥ गंधपुष्पफलैर्युक्तान्भक्त्या तत्परमानसः ॥ व्रतिनः कार्तिके मासि वर्तते पि
तृतर्पणे ॥ तिलास्तत्संख्यकाब्दानि पितरः स्वर्गवासिनः ॥ १९ ॥ ततो जलाद्विनिष्क्रम्य शुचि

वस्त्रधरो व्रती ॥ प्रातः कालादिकं कर्म समाप्यार्चे हरिः पुनः ॥ २० ॥ तीर्थादिदेवान् संस्मृ
त्य पुनरर्घ्यं प्रदापयेत् ॥ गंधपुष्पफलैर्युक्तान् भक्तो तत्परमानसः ॥ २१ ॥ व्रतिनः कार्ति
के मासि स्नातस्य विधिवन्मम ॥ गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ २२ ॥ ततश्च ब्रा
ह्मणान् भक्त्या पूजयेद्वेदपारगान् ॥ गंधैः पुष्पैः सतांबूलैः प्रणमेच्च पुनः पुनः ॥ २३ ॥ ती
र्थानि दक्षिणे पादे वेदाः सन्मुखमाश्रिताः ॥ सर्वांगेष्वाश्रिता देवाः पूजितास्तेन दर्श
या ॥ २४ ॥ अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि ॥ नावमान्या नो विरोध्याः क
दाचिद्धि शुभमिच्छता ॥ २५ ॥ ततो हरिप्रियां देवीं तुलसीं मर्चयेद्व्रती ॥ प्रदक्षिणानमस्कारा
न् कुर्यादेकाग्रमानसः ॥ २६ ॥ देवैस्त्वमर्मिता पूर्वमर्चितासि मुनीश्वरैः ॥ नमो नमस्ते
तुलसि पापं हर हरिप्रिये ॥ ततो विष्णुकथां श्रुत्वा पौराणी स्थिरमानसः ॥ ब्राह्मणांश्च

॥कार्ति॥
॥१२॥

मुनींश्चैव प्रजयेद्भक्तिमान्व्रती ॥२८॥ एवं सर्वविधिं सम्यक् कुर्वीतं भक्तिमान्नरः ॥ क
रोतियः स लभते नारायणसेलोकतां ॥२९॥ रोगापहं पातकनाशकृत्परं सद्बुद्धिदं पुत्र
धनादिसाधकं ॥ मुक्तेर्निदानं न हि कार्तिकव्रताद्विष्णुप्रियादन्यदिहास्ति भूतले ॥३०॥
॥ ॥इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये षष्ठोध्यायः ॥ ॥नारद उ० ॥ ॥कार्तिकव्रति
नां पुंसां नियमा ये प्रकीर्तिताः ॥ तांछृणुष्व मया राजन् कथ्यमानान्समासतः ॥१॥ स
र्वामिषाणि मांसं च क्षुद्रं सौवीरकं तथा ॥ राजिकं मोदकं चापि नैवेद्यात्कार्तिकव्रती ॥२॥ द्वि
दलं तिलतैलं च तदन्नं शास्त्रदूषितं ॥ भावदुष्टं शब्ददुष्टं वर्जयेत्कार्तिकव्रती ॥३॥ देव
देवद्विजातीनां गुरुगोव्रतिनां तथा ॥४॥ प्राण्यंगमामिषं चूर्णं फले जंबीरमामिषं ॥ धान्ये
मसूरिका प्रोक्ता अन्नं पर्युषितं तथा ॥ गोम्रतादन्यदुग्धादि चामिषं संप्रकीर्तितं ॥ द्वि

४ सहर
४ कांजि

जीव ३ प५ वल्लैसा जनवक्षाचिफल४ निबु३

खादिसामुद्रिक० कोद्रा३ लशुन गाजर३

जक्षीलरसाःसर्वेलवणान्यभिजंतथा॥ब्रह्मचर्यमधःसुप्तिंपत्रावल्यांचभोजनं॥चतुर्थका
लेभुंजीतकुर्यादेवंसदाव्रती॥नरकस्यचतुर्दश्यांतैलाभ्यंगंतुकारयेत्॥अन्यत्रका
र्तिकेमासितैलाभ्यंगंविवर्जयेत्॥८॥पलांडुंलशुनंगृंजंछत्राकंगृंजरंतथा॥कालिंको
मूलंशिग्रुंचवर्जयेत्कार्तिकव्रती॥अलांबुंचापिवंताकंकूष्मांडंबृहतीफलं॥श्लेष्मात
कंकपित्थंचवर्जयेद्वैष्णवव्रती॥रजस्वलांत्यजम्लेंच्छपतितान्व्रतकैस्तथा॥द्विजद्विड्वेद
बाह्येश्चनवदेत्सर्वदाव्रती॥एभिर्दुष्टंचकाकैश्चसूतकान्नंचवर्जयेत्॥द्विःपाकि
वदग्धान्नंनैवेद्याद्वैष्णवव्रती॥१२॥एतांन्नित्यंव्रतीसर्वव्रतेष्वपि॥कूष्मादीनिचकुर्वीत
स्वशास्त्राविलुपये॥१३॥कूष्मांडंबृहतीतरुणींमूलकंतथा॥श्रीफलंचकलिंगंचफ
लंधात्रीफलंतथा॥१४॥नारिकेलमलांबुंचपटोलंबदरीफलं॥चर्मवृंताककंचवल्लीदा

कपलिनि
वेदेष्ठ४
सेंमुचासे
०मा

फोकर३
सोलोरि०

२ निवर्जये ६धी१ चायीन२ सालि०

कंतु लसिजं तथा ॥ त्राकान्येतानि वर्ज्यानि क्रमात्संतिपदादिषु ॥ धात्रीफलं रवौ तद्वद्वर्जयेत्स
र्वदा गृही ॥१६॥ एभ्योन्यद्वर्जयेत्किंचिद्विष्णोश्च प्रीतिकृन्नरः ॥ तत्पुनर्ब्राह्मणे दत्वा भक्षयेत्स
र्वदा गृही ॥१७॥ एवमेव हि माघेपि कुर्याच्चेन्नियमान्व्रती ॥ हरिजागरणं तत्र प्रबोधोक्तं तु कारये
त ॥१८॥ यथोक्तकारिणं दृष्ट्वा कार्त्तिकव्रतिनं नरं ॥ यमदूताः पलायंते गजाः सिंहार्दिता य
था ॥ वरं विष्णुव्रतं ह्येतन्नयज्ञशतयाजकः ॥ यज्ञकृत्वाप्नुयात्स्वर्गं वैकुंठं कार्त्तिकव्रती ॥२०॥
भुक्तिमुक्तिप्रदानि स्युर्यानि क्षेत्राणि भूतले ॥ वसंति तानि वै देहे कार्त्तिकव्रतकारिणः ।
दुःस्वप्नं दुःष्कृतं किंचिन्मनोवाक्कायकर्मजं ॥ कार्त्तिकव्रतिनं दृष्ट्वा विलयं यांति तत्क्षणात् ॥२१॥
कार्त्तिकव्रतिनः पुंसो विष्णुवाक्यप्रणोदिताः ॥ रक्षां कुर्वंति शक्राद्या राजानः किंकरयथा
विष्णुव्रतकरो नित्यं यत्र तिष्ठति सज्जितः ॥ ग्रहभूतपिशाचाद्या नैव तिष्ठंति तत्र हि ॥२२॥ का

र्त्तिकव्रतिनः पुंसो यथोक्तव्रतकारिणः॥ नस्समर्थो न वेदकं ब्रह्मापि हि चतुर्मुखः॥२५॥ श्रि
युत्रियं सकलकल्मषनाशनं वंसतुत्रपौत्र धनधान्यविवृद्धिकारि॥ कुर्जे व्रतं सति यमं कुरु
ते मनुष्यः किं तस्य तीर्थपरिशीलनमस्ति दयाचार॥२६॥ ॥इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये स
प्तमोध्यायः॥ ॥नारद उ०॥ ॥अथोर्ज्जे व्रतिनः सम्यगुद्यापनविधिं नृप॥ तच्छृणुष्व मयाख्या
तं सविधानं समासतः॥१॥ ऊर्ज्जे शुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥ व्रतसंपूर्णतार्थाय वि
ष्णुप्रीत्यर्थमेव च॥ तुलस्या उपरिष्टात्तु कुर्यान्मंडपिकां शुभां॥ सतोरणां चतुर्द्वारां पुष्प
चामरशोभितां॥ द्वारेषु द्वारपालांश्च पूजयेन्मन्मयान्पृथक्॥ पुण्यशीलसुशीलंच
जयं विजयमेव च॥ तुलसीमूलदेशे च सर्वतोभद्रसंज्ञकं॥ चतुर्भिर्वर्ण्णकैः सम्यक्कृत्वा
भाढ्यं समलंकृतं॥ तस्योपरिष्टात्कलशं पंचरत्नसमन्वितं॥ फलतपके नस्त्रगिलैकुंभ

तत्र निधाय च ॥ ८ ॥ पूजयेत्तत्र देवेशं सुवर्णप्रतिमं हरिं ॥ उपचारैः षोडशभिः नानै
र्भक्ष्यसमन्वितैः ॥ रात्रौ जागरणं कुर्याद्गीतवाद्यादिमंगलैः ॥ गीतं कुर्वंति ये भक्त्या जा
गरे चक्रपाणिनः ॥ जन्मांतरशतोद्भूतैस्ते मुक्ताः पापसंचयैः ॥ नराणां जागरे विष्णोर्गीतं
नृत्यं प्रकुर्वतां ॥ ९ ॥ गोसहस्रं च ददतो समं फलमुदाहृतं ॥ गीतनृत्यादिकं कुर्वन्दर्शयन्कौ
तुकानि च ॥ १० ॥ पुरतो वासुदेवस्य रात्रौ ये हरिजागरे ॥ पठन्विष्णुचरित्राणि यो रंजय
ति वैष्णवान् ॥ ११ ॥ मुखेन कुरुते वाद्यं स्वेच्छोलापांश्च दर्शयन् ॥ भावैरेतैर्नरो यस्तु कुरुते ह
रिजागरं ॥ दिने दिने तस्य पुण्यं तीर्थकोटिसमन्वितं ॥ ततस्तु पश्चिमायां तु सपत्नीकान्द्वि
जोत्तमान् ॥ त्रिंशन्मितानथैकं वा स्वशक्त्या वा निमंत्रयेत् ॥ वरं दत्वा यतो विष्णुर्मत्स्य[illegible]
भवेत्ततः ॥ १४ ॥ अस्यां दत्तं हुतं जप्तं तदक्षयफलं स्मृतं ॥ अतस्तान्भोजयेद्विप्रान्पायस
न्नादिना व्रती ॥ अतो देवा इति द्वाभ्यां जुहुयात्तिलपायसं ॥ प्रीत्यर्थं देवदेवस्य दे

वानां च पृथक् पृथक्॥ गन्धाद्दक्षिणां च यथाशक्त्या प्रदद्यात्प्रणमेच्च तान्॥ पुनर्देवं
समभ्यर्च्य देवांश्च तुलसीं तथा॥१७॥ ततो गां कपिलां तत्र पूजयेद्विधिवद्व्रती॥ गु
रुं व्रतोपदेष्टारं वस्त्रालंकरणादिभिः॥१८॥ सपत्नीकं समभ्यर्च्य तांश्च विप्रान्स
मापयेत्॥ युष्मत्प्रसादाद्देवेशाः प्रसन्नोस्तु सदा मम॥१९॥ व्रतादस्माच्च यत्पु
ण्यं सप्तजन्मकृतं मया॥ तत्सर्वं नाशमाप्नोतु स्थिरा मे वास्तु संततिः॥२०॥ मनोरथास्तु स
फलाः सन्तु नित्यं ममाग्रतः॥ दृढं ते वैष्णवं देवस्थानं प्राप्नुयामतिदुर्लभं॥२१॥ इति संप्रा
प्य तान्विप्रान् प्रसाद्य च विसर्जयेत्॥ ताम्रं श्रीगुरवे दद्यात्क्रोयुक्तां तु सदा व्रती॥२२॥ तत
सुहृद्बन्धुयुतः स्वयं भुंजीत भक्तिमान्॥ कार्त्तिके व्रतदुष्वरिविधिरेवं विधिः स्मृतः॥२३॥ ए
वं यः कुरुते सम्यक् कार्त्तिकस्य व्रतं नरः॥ स विपाप्मा सर्वपापाद्यो विष्णुसांनिध्यगो भ

॥का॰मा॥
॥१५॥

वेत्॥ सर्वैर्व्रतैः सर्वतीर्थैः सर्वदानैश्च यत्फलं। तत्कोटिगुणितं ज्ञेयं सम्यगस्य विधा
नतः॥ ते धन्यास्ते सदा पूज्यास्तेषां च सफलो भवः॥ विष्णुभक्तिरता ये स्युः कार्त्तिक
व्रतकारिणः॥ देहस्थितानि पापानि विलयं यांति तद्भयात्॥ कर्त्तास्यामः करिष्यामो य
दूर्ज्जे व्रतकं नरः॥२७॥ इत्यूर्ज्जे व्रतनियमान् करोति भक्त्या यो वैतत्कथयति वैष्णवा
ग्रतः सन्॥ तौ सम्यग्व्रतनिकरात्फलं लभेते सर्वं कलुषविनाशनं लभेते॥२८॥ इति
श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये चतुर्दशमोध्यायः॥ ॥ पृथुरुवाच॥ ॥ यत्त्वया कथितं ब्र
ह्मन् व्रतमूर्ज्जस्य विस्तरात्॥ तत्र या तुलसीमूले विष्णोः पूजा त्वयोदिता॥१॥ तेनाहं प्र
ष्टुमिच्छामि माहात्म्यं तुलसीभवं॥ कथं माता प्रिया तस्य देवदेवस्य शार्ङ्गिणः॥२॥ कथ
मेषा समुत्पन्ना कस्मिन्स्थाने च नारद॥ एतद्ब्रूहि समासेन सर्वज्ञोसि मतो मम॥३॥ ॥नारद उ॰॥

॥राम॥
॥१५॥

शृणु राजन्नवहितो माहात्म्यं तुलसीभवं ॥ सेतिहासं पुरावृत्तं तत्सर्वं कथयामि ते ॥ ४ ॥ पुरा श-
क्रः शिवं द्रष्टुमगात्कैलासपर्वतं ॥ सर्वदेवैः परिवृतः नसुरोगणसेवितः ॥ ५ ॥ यावद्गतः शिव-
गृहं तावत्तत्र सदृश्वान् ॥ पुरुषं भीमकर्माणं दंष्ट्रानयनभीषणं ॥ स पृष्टस्तेन कस्त्वं भो क्व गते
स्ति महेश्वरः ॥ एवं पुनः पुनः पृष्टः स यदा नोचिवान्नृप ॥ ततः क्रुद्धो वज्रपाणिः स तं निर्भर्त्स्य
वचोऽब्रवीत् ॥ रमया पृच्छमानोपि नोत्तरं दत्तवानसि ॥ अतस्त्वां हन्मि वज्रेण कस्ते त्राता स्ति
दुर्मते ॥ इत्युक्त्वा दीर्घ ततो वज्री वज्रेण प्राहनद्दृढं ॥ ९ ॥ तेनास्य कंठो नीलत्वमगाद्दग्धं च भस्म-
तां ॥ ततो रुद्रः प्रजज्वाल तेजसा प्रदहन्निव ॥ १० ॥ दृष्ट्वा बृहस्पतिस्तूर्णं कृतांजलिपुटोभ्यधा-
त् ॥ इदं च दंडवद्भूमौ कृत्वा स्तोतुं प्रचक्रमे ॥ ११ ॥ बृहस्पतिरुवाच ॥ नमो देवाधिदेवाय त्र्यंबका-
य कपर्दिने ॥ त्रिपुरघ्नाय शर्वाय नमोंधकनिषूदन ॥ १२ ॥ विरूपायातिरूपाय बहुरूपा-
य शंभवे ॥ यज्ञविध्वंसकर्त्रे च यज्ञानां फलदायिने ॥ १३ ॥ कालांतकाय कालाय काल

॥का॰पा॥
॥१६॥

भोगधराय च॥ नमो ब्रह्मशिरोहंत्रे ब्रह्मण्याय नमो नमः॥१४॥ ॥नारद उवाच॥ ॥एवं
स्तुतः स्तुतः शंभुर्धिषणेन जगाद ह॥ संहरंल्लयनं चो लोकं त्रिलोकीं दहनक्षमं॥१५॥ वर
वरस्य भो ब्रह्मन् प्रीतस्तुत्यानया तव॥ इदं स्यजीवदानेन जीवेति त्वं तथा द्विज॥१६॥ ॥
बृहस्पतिरुवाच॥ ॥यदि तुष्टोसि भगवन् पाहि मां शरणागतं॥ अग्निरेष त्वया मुय
तु भालनेत्रसमुद्भवः॥१७॥ ॥ईश्वर उवाच॥ ॥पुनः प्रवेशमायाति भालनेत्रे कां
शी रवी॥ एनं त्यजाम्यहं दूरं यथेंदुं नैव पीडयेत्॥१८॥ ॥नारद उवाच॥ ॥इत्युक्
क्तो तं करे धृत्वा प्राक्षिपल्लवणांभसि॥ सोऽपतत्सिंधुगंगायाः सागरस्य च संगमे॥१९॥
तावत्स बाडवरूपत्वमगात्तत्र रुरोद ह॥ रुदतस्तस्य शब्देन प्राकंपद्धरणी बहु॥२०॥ स
र्गश्च सत्यलोकांतास्तस्य नादधरीकृताः॥ श्रुत्वा ब्रह्मा ययौ तत्र किमेतदिति विस्मि

॥राम॥
॥१६॥

ततःश्चप्रतातान्त्समुद्रस्योत्तुंगे तं बालं स ददर्श ह॥ दृष्ट्वा ब्रह्माणमायांतं समुद्रोपि कृतांज
लिः॥ प्रणम्य शिरसोत्संगे तस्य बालं न्यवेशयत्॥ सोब्रह्मन्सिंधुगंगायां जातोयं म
म पुत्रकः॥ जातकर्मादिसंस्कारान् कुरुष्वास्य जगत्पते॥२४॥ ।नारद उ०॥ ।इत्यं ब्रुव
तो जलधौ स बालः सागरात्मजः॥ ब्रह्माणमग्रहीत्कूर्चे विधुन्वंतं मुहुर्मुहुः॥२५॥ धु
न्वतस्तस्य कूर्चं तं नेत्राभ्यामगमज्जलं॥ कथं विमुक्तकूर्चोय ब्रह्मा प्रोवाच सागरो॥२॥
॥ ब्रह्मोवाच॥ ॥नेत्राभ्यां विधृतं यस्मादनेनैव जलं मम॥ तस्माज्जलंधर इति ख्यातो ना
म्नाम भवत्यसौ॥२७॥ ॥सूत उवाच॥ ॥अधुनैवैष्यतरुणः सर्वशास्त्रास्त्रपारगः॥ अ
वध्यः सर्वभूतानां विना रुद्रं भविष्यति॥ इत्युक्त्वा शुक्रमाहूय राज्ये तं चाभिषेचयत्॥ सा
र्धं सरितानाथं ब्रह्मांतर्धानमागमत्॥२९॥ तथा तद्दर्शनोत्फुल्लनयनः सागरः स

दा॥ कालनेमिसुतां वृंदां तज्जायार्थमयाचयत्॥ ते कालनेमिप्रमुखास्ततोसुरास्तस्मै सु
तां तां प्रदद्दुः सुहर्षिताः॥ स चापि तां प्राप्य सुहृद्वरान्वशी शशास गां सुऋसहायवान्बल
॥२१॥ ॥इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये जलंधरोपाख्याने नवमोध्यायः॥ ॥ये दे
वैर्निर्जिताः पूर्वं दैत्याः पातालसंस्थिताः॥ तेपि भूमंडलं प्राप्ता निर्भयास्तमुपाश्रिताः॥१॥
कदाचिच्छिन्नशिरसं राहुं दृष्ट्वा स दैत्यराट्॥ पप्रच्छ भार्गवं तस्य शिरश्छेदस्य कारणं॥२॥ स
शशंस समुद्रस्य मथनं त्रिदशैः कृतं॥ रत्नोपहरणं चैव दैत्यानां च पराभवं॥३॥ तच्छ्रुत्वा कौ
धरक्ताक्षः स्वपितुर्मथनं तदा॥ दूतं संप्रेषयामास घस्मरं शक्रसन्निधौ॥४॥ दूतस्त्रिवि
ष्टपं गत्वा सुधर्मां प्राविशद्द्रुतं॥ जोर्द्धादस्वर्वमौछिस्तु देवेंद्रं वाक्यमब्रवीत्॥५॥ घस्म
रउवाच॥ ॥जलंधरोब्धितनयः सर्वदैत्यजनेश्वरः॥ दूतोहं प्रेषितस्तेन स यदाहन्स्यपु

षतता॥५॥ ॥घस्मर उवाच॥ ॥जलंधरोब्धितनयः सर्वदैत्यजनेश्वरः॥ दूतोहं प्रेषितस्ते
न स यदाह शृणुष्व तत्॥६॥ कस्मात्त्वया मम पिता मथितः सागरो द्विणा॥ नीतानि सर्व
रत्नानि तानि शीघ्रं प्रयच्छतः॥७॥ ॥नारद उवाच॥ इति तस्य वचः श्रुत्वा विस्मितः त्रि
दशाधिपः॥ उवाच संस्मरंनरुद्रं भयरोषसमन्वितः॥८॥ ॥इंद्र उवाच॥ शृणु दूत म
या पूर्वं मथितः सागरो यथा॥ अद्रयो मद्भयात्त्रस्ताः स्वकुक्षिस्थाः कृतास्तथा॥९॥ अन्ये
पि मद्द्विषस्तेन रक्षिता दितिजाः पुरा॥ तस्मात्तद्रत्नजातं तु मया व्यापहृतं ततः॥१०॥ शंखो
प्येवं पुरा देवान्द्विषत्सागरात्मजः॥ ममानुजेन निहतः प्रविष्टः सागरोदरं॥११॥ तद्गच्छ क
थयस्वास्य सर्वं मथनकारणं॥ ॥नारद उ०॥ इत्थं विसर्जितो दैत्यः स्वादेंद्रेणागमद्भुवं॥१२॥
तदिदं वचनं सर्वं दैत्यायाकथयत्तदा॥ तं निशम्य तदा दैत्यो रोषात्प्रस्फुरिताधरः॥१३॥ उ
द्योगमकरोत्तूर्णं सर्वदेवजिगीषया॥ तस्योद्योगैः सुरेंद्रस्य दिग्भ्यः पातालतस्तथा॥१४॥

का॰मा॰

१९

दितिजाश्चाभ्यपद्यंत कोटिशः कोटिशस्तदा ॥ अथ शुंभनिशुंभाद्यैर्दैत्याधिपतिकोटिभिः
गत्वा त्रिविष्टपं दैत्यो नंदनाधिष्ठितोभवत् ॥ निर्ययुश्चामरावत्या देवा युद्धाय दंशि-
ताः ॥ पुरमावृत्य तिष्ठंतु दृष्ट्वा दैत्यबलं महत् ॥ ततः समभवद्युद्धं देवदानवसेनयोः ॥
मुशलैः परिघैर्बाणैर्गदाशक्तिपरश्वधैः ॥ अन्योन्यं समधावंत निजघ्नुश्च परस्परं ॥ धा-
तोऽभवत्तां सैन्ये रुधिरौघप्रवर्षिणी ॥ पतितैः पासमानैश्च गजाश्वरथपत्तिभिः ॥ स्र-
राजत रक्तौर्म्मिभिः संध्याभ्रपटलैरिव ॥ तदा युद्धमृतान्दैत्यान्भार्गवस्तदविष्ठयत्ना-
त् ॥ विद्यया मृतजीविन्या मंत्रैस्तोयदविंदुभिः ॥ देवानपि हतान्युद्धे समजीवयदं-
गिराः ॥ दिव्यौषधीः समानीय द्रोणाद्रेः संपुनः पुनः ॥ दृष्ट्वा दैत्यान्हतान्युद्धे पुनरेवसमु-
त्थितान् ॥ जलंधरः क्रोधवशो भार्गवं वीक्ष्य चाब्रवीत् ॥ ॥ जलंधर उवाच ॥ ॥ मयायु-
द्धे हता देवा उत्तिष्ठंति कथं पुनः ॥ २२ ॥ त्वदीयाज्जीविनी विद्या नैवान्यो वेत्ति विश्रुतं

शुक्र उवाच॥ दिव्यौषधीः समानीय द्रोणाद्रेरंगिरात्सुरान्मृ॥ जीवयत्येव तच्छीघ्रं द्रोणाद्रिं
त्समुपाहर मारदतु वाच्चा॥ इत्युक्तः स तु दैत्येंद्रो नीत्वा द्रोणाचलं तदा॥ प्राक्षिपत्सागरे तूर्णं पु
नरागान्महाहवे॥२६॥ अपदेवान्हतान्दृष्ट्वा द्रोणाद्रिमगमद्गुरुः॥ तावत्तत्र गिरींद्रं तं न दद
र्श सुरार्चितः॥२७॥ ज्ञात्वा दैत्यहृतं द्रोणं धिषणो भयविह्वलः॥ आगत्य दूराद्व्याजह्रे व्या
साकुलितविग्रहः॥ पलायध्वं महादेवा नो जयेयुः क्षयो ह्यतः॥ रुद्रांशासंभवो ह्येष स्मर
ध्वं शुक्रचेष्टितं॥ श्रुत्वा तद्वचनं देवास्त्रयविक्लितास्तदा॥ देहे दैत्यैर्वध्यमानाश्च पलायं
तं दिशो दश॥३०॥ देवान्विद्रावितान्दृष्ट्वा ततः सागरनंदनः॥ शंखभेरीजयरवैः प्रविवे
शामरावतीं॥३१॥ प्रविष्टे नगरीं दैत्ये देवाः शक्रपुरोगमाः॥ सुवर्णाद्रिं गुहां गत्वा न्यवसन्दै
त्यतापिताः॥३२॥ ततः स सर्वेषु सुराधिकारेष्विंद्रादिकानां विनिवेश्य तदा॥ शुंभादिकान्
दैत्यवरान्पृथक्पृथक् स्वयं सुवर्णाद्रिगुहामगात्पुनः॥३३॥ ॥इति कार्तिकमाहात्म्ये

दशमोध्यायः॥ ॥नारद उवाच॥ ॥पुनर्दैत्यं समायांतं दृष्ट्वा देवाः सवासवाः॥ भयप्रकंपि-
ताः सर्वे विष्णो स्तोत्रं प्रचक्रमुः॥ ॥देवा ऊचुः॥ ॥नमो मत्स्यकूर्मादिनानास्वरूपैः स-
दा भक्तकार्योद्यतायार्तिहंत्रे॥ विधात्रादिसर्गस्थितिध्वंसकर्त्रे गदाशंखपद्मादिहस्ता-
य ते ऽस्तु॥२॥ रमावल्लभायासुराणां निहंत्रे भुजंगारियानाय पीतांबराय॥ मखादिक्रिया-
पाककर्त्रे विकर्त्रे शरण्याय तस्मै नतास्मो नतास्मः॥३॥ नमो दैत्यसंतापितामर्त्यदुःखा-
चलध्वंसदक्षोलये विष्णवे ते॥ भुजंगेशतल्पेशयायार्कचंद्रद्विनेत्राय तस्मै नतास्मो न-
तास्मः॥४॥ ॥नारद उवाच॥ ॥संकष्टनाशनं नाम स्तोत्रमेतत्पठेन्नरः॥ स कदा-
चिन्न संकटैः पीड्यते कृपया हरेः॥५॥ इति देवाः स्तुतिं यावत्कुर्वंति दनुजद्विषः। ता-
वत्सुराणामापत्तिर्विनाशिता विष्णुना तदा॥६॥ [illegible] सोत्थाय दैत्यारिः कृपयाद्रिसुमानतः
आरुह्य गरुडं वेगाल्लक्ष्मीवचनमब्रवीत्॥७॥ ॥श्रीभगवानुवाच॥ ॥जलंधरगते

मा देवानां कदनं कृतं ॥ तैराहूतो गमिष्यामि युद्धायाद्यबलान्वितः ॥ ८ ॥ अहं ते वल्लभ
नाथ भक्ता च यदि सर्वदा ॥ तत्कथं ते मम भ्राता युद्धे वध्यः कृपानिधे ॥ ९ ॥ श्रीभगवानु
॥ ॥ रुद्रांशसंभवत्वाच्च ब्रह्मणो वचनादपि ॥ प्रीत्या च तव नैवायं मम वध्यो जलंधरः
१० ॥ ॥ नारद उ० ॥ ॥ इत्युक्त्वा गरुडारूढः शंखचक्रगदाधरः ॥ विष्णुर्वेगाद्ययौ यो
द्धुं यत्र देवाः स्तुवंति ते ॥ ११ ॥ अथारुणानुजजवात्पक्षपातप्रकंपिताः ॥ वात्याविवर्ति
ता दैत्याः बभ्रमुः खे घना यथा ॥ १२ ॥ ततो जलंधरो दृष्ट्वा दैत्यान्वात्याभिपीडितान् ॥ उद्वृ
त्तनयनक्रोधात्ततो विष्णुं समभ्ययात् ॥ १३ ॥ ततः समभवद्युद्धं विष्णुदैत्येंद्रयोर्महत् ॥ आ
काशं कुर्वतो बाणैस्तदा निरवकाशवत् ॥ १४ ॥ विष्णुर्दैत्यस्य बाणौघैर्ध्वजं छत्रं धनुर्ह
यान् ॥ चिच्छेद तं च हृदये बाणेनैकेन ताडयत् ॥ ततो दैत्यः समुत्प्लुत्य गदापाणिस्त्वरान्वि

॥का०प०॥
॥२१॥

तः॥ आहत्य गरुडं मूर्ध्नि पातयामास भूतले॥१८॥ विष्णोर्गदां स्वखड्गेन चिच्छेद प्रहसन्निव॥ ताव
त्स हृदये विष्णुं जघान दृढमुष्टिना॥ ततस्तौ बाहुयुद्धेन युयुधाते महाबलौ॥ बाहुभिः मुष्टि
भिश्चैव जानुभिर्नोदयन्मही॥ एवं तौ सुचिरं युद्धं कृत्वा विष्णुः प्रतापवान्॥ उवाच स दैत्यराजा
नं मेघगंभीरया गिरा॥१९॥ ॥श्रीभगवानुवाच॥ ॥वरं वरय दैत्येंद्र प्रीतोस्मि तव विक्रमात्॥ अ
देयमपि ते दद्मि यत्ते मनसि वर्तते॥२०॥ ॥जलंधर उ०॥ ॥यदि भावक तुष्टोसि वरमेनं ददस्व
मे॥ मद्भगिन्या सहितया मद्गेहे सगणो वस॥२१॥ ॥नारद उ०॥ ॥तथेत्युक्त्वा स भगवान्स
र्वैर्देवगणैः सह॥ जालंधरं नामपुरमगमद्रमयासह॥२२॥ जलंधरश्च देवानामधिकारेषु
दानवान्॥ स्थापयित्वा सहर्षः सन् पुनरागान्महीतलं॥२३॥ देवगंधर्वसिद्धेषु यत्किंचिद्रत्नस
ञ्चितः॥ तदात्मवशगं कृत्वातिष्ठत्सागरनंदनः॥२४॥ पातालभुवने दैत्यं निशुंभं सुमर

२०

बली ॥ स्थापयित्वा सशेषादीनानयद्दतलं बलं ॥ २५ देवगांधर्वसिद्धाद्यान्यक्षराक्षसमानु
षान् ॥ स्वपुरे नागरान्कृत्वा शशास भुवनत्रयं ॥ २६ ॥ एवं जलंधरः कृत्वा देवान्स्ववशवर्त्तिनः ।
धर्मेण पालयामास प्रजाः पुत्रानिवौरसान् ॥ २७ ॥ न पुमान्व्याधितः कश्चिद्दुःखितो न कृशस्त
था ॥ न दीनो दृश्यते तत्र धर्मोऽस्ये प्रशासति ॥ २८ ॥ एवं महीं प्रशासति दानवेंद्रे धर्मेण स
म्यक्कृ ते परद्वेषयाहं ॥ कदाचिदागमत्तस्य लक्ष्मीं विलोकितुं श्रीरमणं चसेवितुं ॥ ३० ॥
॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये एकादशोध्यायः ॥ ॥ नारद उ० ॥ समांसे हृष्ट
विधिवद्दामवेंङोतिभक्तिमान् ॥ संप्रहस्य तदा वाक्यं जगादन्नृपसत्तम ॥ १ ॥ कुतस्त्वागम्य
ते ब्रह्मन् किंचिद्दृष्टं त्वया क्वचित् ॥ यदर्थमिह चायातस्तदाख्यापयमां प्रभो ॥ २ ॥ श्रुत्वा तद्
वचनं राजन्नुवं: हिलंधरं ॥ कैलासशिखरे राजन्नगतोहं स्वेच्छया नृपं ॥ तत्रोमयासमासी

॥का॰पु॰॥
॥२१॥

नं दृष्टवानस्मि शंकरं ॥ योजनायतविस्तीर्णे कल्पवृक्षमहावने ॥ कामधेनुशताकीर्णे चिंता
मणिसुदीपिते ॥ तं दृष्ट्वा महदाश्चर्यं वितर्कमेभवत्तदा ॥ कापीदृशी भवेल्लक्ष्मी स्त्रीलोकेया
वानवेति वा ॥ ५ ॥ तावत्तयापि दैत्येंद्र समृद्धिः संस्मृता मया ॥ तद्विलोकनकामोहं त्वत्सकाश
मिहागतः ॥ ६ ॥ त्वत्समृद्धिमिमां पश्यन् स्त्रीरत्नरहितां ध्रुवं ॥ तर्कयामि शिवादन्यस्त्रिलोके कृ
न समृद्धिमान् ॥ ७ ॥ अप्सरो नागकन्या वा यक्षपि त्वदृशोस्ति ताः ॥ तथाप्येका न पार्वत्याः क
लास दृशी ध्रुवं ॥ ८ ॥ तस्या लावण्यजलधौ निमग्नश्चतुराननः ॥ स्ववीर्यमनुवत्सर्वं तयां
कान्योपमीयते ॥ वीतरागोपि हि यथा मदनारिः स्वलीलया ॥ सौंदर्यगहने भ्रान्तिन्नावती
रूपया पुरा ॥ १० ॥ तस्याः पुनः पुनः पश्यन् रूपं धाता ससर्ज्जने ॥ सलज्जौ स्मरसक्तासां
तत्समै कापि ताभवत् ॥ ११ ॥ अतस्त्रीरत्नसंसोकुः समृद्धिस्तत्स्यसावरा ॥ तथापि तव दैत्ये

॥२१॥

डु सर्वरत्नाधिपस्य च ॥ एवमुक्त्वा तमामंत्र्य ॥ ते मत्रिस दैत्यराट् ॥ तद्रूपश्रवणादासीदनंगज्व
रपीडितः ॥१२॥ अथ संप्रेषयामास स दूतं सिंहिकासुतं ॥ त्र्यंबकाय तदा किंचिद्विष्णुमाया
विमोहितः ॥१३॥ कैलासमगमद्राहुः कुर्वं छुष्केंदुवर्द्धसं ॥ कार्ष्णेन ह्लत्पदक्ष्वेंदुवर्द्धसं स्वांगदे
न तं ॥१४॥ निवेदितस्तु देवीय नंदिना प्रविवेश सः ॥ त्र्यंबकं प्रल्लतासंज्ञा प्रेरितो वाक्यमब्र
वीत् ॥१५॥ राहुरुवाच ॥ देवपन्नगसेव्यस्य त्रैलोक्याधिपतेरपि ॥ सर्वरत्नेश्वरत्वस्य मानं
तु वृषध्वज ॥१६॥ श्मशानवासिनो नित्यमस्थिभारवहस्य च ॥ दिगंबरस्य ते भार्या कथं भ
मवती शुभा ॥१७॥ अहं रत्नाधिनाथोस्मि सा च स्त्रीरत्नसंज्ञिता ॥ तस्मान्ममैव सा योग्या नैव
भिक्षाशिनस्तव ॥१८॥ ॥ नारद उवाच ॥ वदत्येवं तदा राहौ भ्रूमध्याच्छूलपाणिनः ॥ [illegible]
वल्गुरूपो रौद्रस्त्री ब्राशनिसमस्वनः ॥ भ्रूपास्यः प्रलयाग्नीक्ष्णः प्रज्वलं लेलयनो महान् ॥ [illegible]
केशः श्मश्रुकृतं तुर्न सिंहद्द इति वा परः ॥ स तं रवादितं मायां तं दृष्ट्वा राहुर्भयातुरः ॥ [illegible]

॥का॰प॰॥
॥२२॥

इति वेगेन बहिः स्तवद्धारतिं ॥२१॥ घत्वो खादितुमारब्धस्तावद्रुद्रेण वारितः ॥ नैवासौ वध्य
तामेति दूतो हि परवान्यतः ॥२२॥ मुंचेति पुरुषः श्रुत्वा राहुं तत्याज सोंबरे ॥ राहुं त्यक्त्वा स पुरु
षः ततो रुद्रं प्राजिज्ञपत ॥२३॥ ॥पुरुष उ०॥ ॥क्षुधा मां बाधते सर्थं क्षुत्क्षामश्चास्मि सर्वथा ॥
भक्षये किमहं देव तदाज्ञापय मां प्रभो ॥२४॥ ईश्वर उ०॥ ॥सो भक्षः स्वात्मनः शीघ्रं मांस
त्वं हस्तपादयोः ॥२५॥ ॥नारद उ०॥ ॥स शिवेनैवमाज्ञप्तश्चखाद पुरुषः स्वकं ॥ हस्तपा
दोद्भवं मांसं शिरःशेषो यथाभवत् ॥२६॥ दृष्ट्वा शिरोवशेषं तं सुप्रसन्नः सदाशिवः ॥ उवा
च भीमकर्माणं पुरुषं जातविस्मयः ॥२७॥ ईश्वर उवाच ॥ ॥स्वकीर्तिमुखसंज्ञो हि म
द्द्वारस्थो भव सर्वदा ॥ त्वदर्चां ये न कुर्वन्ति नैव ते मत्प्रियंकराः ॥२८॥ ॥नारद उ०॥ ॥त
दाप्रभृति देवस्य द्वारि कीर्तिर्भवस्थितः ॥ नार्चयन्ति हि ये पूर्वं तेषामर्चा वृथा भवेत् ॥ य
हुमुक्तो यतस्तेन सोपतद्बर्बरस्थले ॥ अतः स बर्बरे जात इति स्मरमो ऽथागतः ॥३०॥ ॥तत

॥२२॥

स्त्वराहुः पुनरेवभ्रातमात्मानमस्मिन्न्दहमन्यमानः ॥ समेस्य सर्वं कथयांबभूव जलंधरो
येशाविदेहितंवतल ॥ ३४ ॥ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये द्वादशोध्यायः ॥ ॥
नारद उ० ॥ ॥ जलंधरस्ततश्रुत्वा कोपाकुलितविग्रहः ॥ निर्जगामाशु दैत्यानांकोटिभिः
परिवारितः ॥ गच्छतोस्याग्रतः शुक्रो राहुर्दृष्टेः स्थितोऽभवत् ॥ मुकुटश्चाभवद्भूमौ वेगा
त्स्खलितस्तदा ॥ देवसैन्यावृतैस्तस्य विमानानां शतैस्तदा ॥ व्यराजत नभः पूर्णंप्राव
षीवयथाघनैः ॥ २ ॥ तस्योद्योगं तदा दृष्ट्वा देवाः शक्रपुरोगमाः ॥ अलक्षितास्त्वराजग्मुः
शूलिनं तेविजिज्ञिपुः ॥ ४ ॥ ॥ देवा ऊचुः ॥ ॥ नज्ञानासि कथं स्वामिन् द्विषः पतिमिमं वि
भो ॥ तदस्मद्दृष्टोर्थाय जहि सागरनंदनं ॥ ५ ॥ नारद उ० ॥ ॥ इति देववचः श्रुत्वा प्रं
स्य वृषभध्वजः ॥ महाविष्णुं समाहूय वचनं चेदमब्रवीत ॥ ६ ॥ ॥ ईश्वर उवाच ॥

जलंधरः कथं विष्णोः न हतः संगरे त्वया ॥ तन्मूहं कारिपार्वत्यै सित्यस्ता वैकुंठमास्मनः ॥ ७ ॥
॥ ॥ विष्णुरु० ॥ ॥ तवांशसंभवत्वाच्च भ्रातृत्वाच्चैव तथा श्रियः ॥ न मया निहतः संख्ये त्वमे
नं जहि दभवं ॥ ८ ॥ ॥ ईश्वर उवाच ॥ ॥ नायमेभिर्महातेजाः शस्त्रास्त्रैर्वध्यते मया ॥ त्व
द्देवैः स्वतेजोंशांशस्त्रास्त्रार्थं दीयतामतः ॥ ९ ॥ ॥ नारद उवाच ॥ ॥ अथ विष्णुमुखा दे
वाः स्वतेजांसि दद्युस्तदा ॥ तान्येकामागतानीशो दृष्ट्वा स्वं चामुचन्महः ॥ १० ॥ तेनाकरो
द्देवो महसा शस्त्रमुत्तमं ॥ चक्रं सुदर्शनं नाम ज्वालामालातिभीषणं ॥ तेजः शेषेण च
था तेजं वा सृतवान्हरः ॥ ११ ॥ तावज्जलंधरो दृष्टः कैलासतलगातिषु ॥ हस्त्यश्वरथप
त्तीनां कोटिभिः परिवारितः ॥ दृष्ट्वा स्वलक्षिता जग्मुर्देवाः सर्वे यथागतं ॥ १२ ॥ गणाश्च
सभक्ताश्चास्वयुद्धायाति त्वरान्विताः ॥ नंदीभवस्त्वसेनानीमुखाः सर्वे शिवाज्ञया ॥ १४ ॥ अ
वहेरुगता वेगात्कैलासाद्युद्धदुर्मदाः ॥ ततः समभवद्युद्धं कैलासोपत्यकाभुवि ॥ प्र

॥२३॥

मथाधिपदैत्यानां घोरं शस्त्रास्त्रसंकुलं ॥ भेरीमृदंगशंखैश्च निस्वनैर्वैरिहेषणैः ॥ १९ ॥ ग
जाश्वरथशब्दैश्च नादिता द्यौर्व्यकंपत ॥ शक्तितोमरबाणौघमुशलप्रासपट्टिशैः ॥ व्योम
जतनभः पूर्णं मुक्ताभिरिव संवृतं ॥ निहतैरथनागाश्वैरणभूमिर्व्यराजत ॥ वज्राहताच
लशिरः शाकलैरिव संवृता ॥ प्रमथाहतदैत्यौघान् भार्गवः समजीवयत ॥ २० ॥ युद्धे पुनः
पुनस्तानमृतसंजीविनीबलात् ॥ तं दृष्ट्वा व्याकुलीभूता गणाः सर्वे भयान्विताः ॥ २१ ॥ गंगो
सुर्देवदेवाय तत्सर्वं शुक्रचेष्टितं ॥ अथ रुद्रमुखात्कृत्या बभूवातीवभीषणा ॥ २२ ॥ ताल
जंघोदरीवक्त्रास्तनापीडितभूरुहा ॥ सा युद्धभूमिमासाद्य भक्षयंती महासुरान् ॥ २३ ॥ भा
र्गवं स्वभगे धृत्वा जगामांतर्हिता नभः ॥ विधृतं भार्गवं दृष्ट्वा दैत्यसेनागणांस्तथा ॥ २४ ॥ प्र
म्लानवदना नूर्णान्निजग्मुर्हर्षदुर्मदाः ॥ अथाऽदृश्यत दैत्यानां सेनागणभयार्दिता ॥ २५ ॥

॥का॰प॥
॥२४॥

वायुवेगाहता यद्वत्तूलकीर्णाल्पापसंहति ॥ भग्नां गणाभया सेनां दृष्ट्वामर्षयुता ययुः ॥ निशुंभश्च
ससेनान्यो कालनेमिश्च वीर्यवान् ॥ त्रयस्ते वारयामासुर्गणसेनां महाबलाः ॥२७॥ मुमुचुः
शरवर्षाणि प्रावृषीव बलाहकाः ॥ ततो दैत्यशरौघास्ते शलभानामिव व्रजाः ॥२८॥ रु
रुधुश्च दिशः सर्वा गणसेनां प्रकंपयन् ॥ गणाः शरशतैर्भिन्ना रुधिरस्राववर्षिणः ॥२९॥
वसंतकिंशुकाभासा न प्रज्ञायत किंचन ॥ पतिताः पात्यमानाश्च छिन्नभिन्नास्तथा गणाः ॥
३०॥ त्यक्त्वा संग्राममस्मिंस्ते सर्वेपि विमुखाभवन् ॥ ततः स्वग [illegible] लं स्वबलं वी
क्ष्य शैलादिलंबोदरकार्तिकेयाः ॥ त्वरान्विता दैत्यवरास्ससह्य निवारयामासुरमर्षणा
स्ते ॥३२॥ ॥इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये त्रयोदशोऽध्यायः ॥ ॥नारद उ
वाच ॥ ॥ते गणाधिपतीन्दृष्ट्वा नंदीसम्मुखषण्मुखान् ॥ अमर्षादभ्यधावंत

हृष्टा योधयदानवाः ॥ १ ॥ नंदिनं कालनेमिश्च शुंभो लंबोदरं तथा ॥ निशुंभः षण्मुखं वेगाद्भ्य
धावत दंशिताः ॥ २ ॥ निशुंभस्तु कार्त्तिकेयस्य सुतीक्ष्णैस्त्रिभिः शरैः ॥ हृदि विव्याध वेगे
न मूर्छितः सपपात ह ॥ ३ ॥ ततः शक्तिधरः शक्तिपावज्जग्राह रोषितः ॥ तावन्निशुंभो वेगेन स्व
शक्त्या तमपातयत् ॥ ४ ॥ ततो नंदी शरव्रातैः कालनेमिं जघान सः ॥ सप्तभिश्च हयान्केतु
मथ सारथिमच्छिनत् ॥ ५ ॥ कालनेमिस्तु संक्रुद्धो धनुश्चिच्छेद नंदिनः ॥ तदपास्य सम्
न्नतं वक्षस्यहन्मदृढं ॥ ६ ॥ मुद्गलं भिन्नहृदयो हताश्वो हतसारथिः ॥ अथैनं शिखरमानु
च्यैर्नीलाद्रिं सोप्यपातयत् ॥ ७ ॥ अथ शुंभो गतो श्वा स्वरथन्नृपकवाहनौ ॥ युध्यमानौ
शरव्रातैः परस्परमवध्यतां ॥ ८ ॥ गणेशस्तु तदा शुंभं हृदि विव्याध पत्रिणा ॥ सारथिं
च त्रिभिर्हत्वा पातयामास भूतले ॥ ९ ॥ मूषकं च त्रिभिर्हत्वा ननाद जलदस्वनः ॥ मूषकः
शरभिन्नांगः स्वचालद्दृढवेदनः ॥ १० ॥ लंबोदरश्च पतितः पदातिरभवन्नृप ॥ ततो

कौ॰ मा॰
२५

लंबोदरः शूलं दत्वा परशुनाहहृदि॥११॥ अथपाशस्यंदान्ममोन्मूर्छकं गोरहहसुनः॥ कालनेमि
र्निशुंभश्च घुभौ लंबोदरं शरैः॥ युगपत्तेनमन्युः आघातोत्रैरिवमहाद्विपो। तं पीड्यमानमा
लोक्य वीरभद्रो महाबलः॥१३॥ अभ्यधावत्तवेगेनमृतकेतिधुतस्तदा॥ कूश्मांडभैरवाद्याश्च
वेतालाद्यायोगिनीगणाः॥१४॥ पिशाचाद्यायोगिनीसंघागणाः सर्वे समन्वयुः॥ ततः किलकिला
रावैः सिंहनादैः सघर्घरैः॥ नादितं डमरूकैश्च पृथिवी च व्यकंपत॥ ततोभूतानि धा
वंति भक्षयंतिस्म दानवान्॥१६॥ उत्पतंत्यापतंतिस्म ननृतुश्चरणांगणे॥ नंदी च कार्त्तिके
यश्चस्कंदश्चैतौ त्वरान्वितौ॥१७॥ निजघ्नतूरणे दैत्यान्निरंतरशरव्रतैः॥ छिन्नभिन्ना
हतैर्दैत्यैः पतितैर्भक्षितैस्तैस्तथा॥१८॥ व्याकुला साभवत्सेना विपक्षा वदनात्तदा॥ प्र
विध्वस्तां तदा सेनां दृष्ट्वा सागरनंदनः॥१९॥ रथेनैकेन सबलीगणानभिययौ द्रुतं॥ हस्त्य
श्वरथसंरूढादशांखभेरीरवस्तथा॥२०॥ अभवत्सिंहनादश्च सेनयोरुभयोस्तदा

२५॥

लंधरश्शरव्रातैर्नीहारपटलैरिव ॥ द्यावापृथिव्योराछिन्नमंबरं समपद्यत ॥ गणेशं पंच
भिर्विव्याधशैलादिं नवभिः शरैः ॥ वीरभद्रं च विंशत्या ननाद जलदस्वनः ॥ कार्त्तिके
यस्तदा दैत्यं शक्त्या विव्याध सत्वरः ॥ व्याघूर्णः शक्तिनिर्भिन्नः किंचिद्व्याकुलमानसः
ततः क्रोधपरीताक्षः कार्त्तिकेयस्य कंधरं ॥ २४ ॥ गदया ताडयामास न्यपतत्स च भूत
ले ॥ २५ ॥ ततो गणेश्वरः क्रुद्धो गदां परशुनाच्छिनत् ॥ वीरभद्रस्त्रिभिर्बाणैर्हृदि दैत्यं विव्या
ध दानवं ॥ २६ ॥ सप्तभिश्च हयान्केतनं धनुश्चिच्छेद छत्रकं ॥ ततः स क्रुद्धो दैत्येंद्रः
शक्तिमुद्यम्य वेगवान् ॥ गणेशं पातयामास रथं चान्यमथारुहत् ॥ अभ्ययादथ वेगेन
वीरभद्रो रुषान्वितः ॥ ततस्तौ सूर्यसंकाशौ युयुधाते परस्परं ॥ वीरभद्रः पुनस्तस्य ह
यान्बाणैरपातयत ॥ २७ ॥ धनुश्चिच्छेद दैत्येंद्रः पट्टिशं परिघायुधाः ॥ स वीरभ

॥का॰ म॰॥
॥२६॥

त्वरयाभिगम्य जघान दैत्यः परिघेण मूर्ध्नि ॥ स चापि दैत्यः प्रविभिन्नमूर्धा पपात भूमौ रु
धिरं समुद्गिरन् ॥ ३१ ॥ ॥ इति श्रीकार्त्तिकमाहात्म्ये चतुर्दशोध्यायः ॥ ॥ नारद उ॰ ॥
पतितं वीरभद्रं तं दृष्ट्वा रुद्रगणा भयात् ॥ आगच्छंस्त्वरितो हित्वा क्रोधमानं महेश्वरं ॥ अ
थ कोलाहलं श्रुत्वा गणानां चंद्रशेखरः ॥ अभ्यगाद्वृषभारूढः संग्रामं प्रहसन्निव
॥ २ ॥ रुद्रमायांतमालोक्य सिंहनादैर्गणाः पुनः ॥ निवृत्ताः संगरे दैत्यान्निजघ्नुः शर
वृष्टिभिः ॥ दैत्यास्त्वभीषणं रुद्रं दृष्ट्वा सर्वे विदुद्रुवुः ॥ कार्त्तिकं बलिनं दृष्ट्वा पातकानीव
तद्भयात् ॥ ४ ॥ अथो जलंधरो दैत्यान् विद्रुतान् प्रेक्ष्य संगरे ॥ शीघ्रादधावच्चंडीशमनुं वर्षन्बा
णान्सहस्रशः ॥ ५ ॥ शुंभो निशुंभश्च मुखौ कालनेमिर्बलाहकः ॥ खड्गरोमा प्रचंडश्च
घस्मराद्याः शिवं ययुः ॥ ६ ॥ बाणांधकारसंछिन्नं दृष्ट्वा गणबलं शिवः ॥ तद्बाणजालमा

सा च स्वबाणैरावृणोन्नभः॥ दैत्यांश्च बाणधाराभिः पीडितानकरोत्तदा॥ प्रचंडं बा
जालौघैरपातयत भूतले॥८॥ खड्गरोमणाशिरः कायात्तथा परशुनाच्छिनत्॥ बला
हकस्य च शिरः खट्वांगेनाकरोद्द्विधा॥ बद्ध्वा च घस्मरं दैत्यं पाशेनाभ्यहनद्भुवि॥ वृषवेग
हताः केचित्केचिद्बाणैर्निपातिताः॥१०॥ न शेकुरसुराः स्थातुं गजाः सिंहार्दिता यथा॥ तत
क्रोधपरीतात्माभ्यगाद्रुद्रं जलंधरः॥ आह्वयामास समरे तीव्राशनिसमस्वनः॥ ज
लंधर उ०॥ ॥युध्यस्वोद्य मया सार्द्धं किमेभिर्निहतैस्तव॥ यच्च किंचिद्बलं तेऽस्ति तद्द
य जटाधर॥१३॥ इत्युक्त्वा बाणसप्तत्या जघान वृषभध्वजं॥ तानप्राप्तांश्छितैर्बाणैश्चिच्छे
द प्रहसन्शिवः॥१४॥ ततो हयान्ध्वजं छत्रं धनुश्छिच्छेद सप्तभिः॥ सच्छिन्नधन्वा वि
रथो गदामुद्यम्य वेगवान्॥१५॥ अभ्यधावद्द्रुतं तावद्गदां बाणैस्त्रिधाच्छिनत्॥ तथा

॥का॰प॰
॥२७॥

पिमुष्टिमुद्यम्य ययौ रुद्रजिघांसया ॥ तावद्विघ्नेन बाणौघैः क्रोशमात्रमयाकृतः ॥
ततो जलंधरो दैत्यो मत्वा रुद्रं बलाधिकं ॥१७॥ स सर्ज्जमायां गांधर्वीमद्भुतां रुद्रमोहिनीं
॥ ततो जगुश्च ननृतुर्गंधर्वाप्सरसां गणाः ॥ तालवेणुमृदंगांश्च वादयंति स्म चापरे ॥ तं
दृष्ट्वा महदाश्चर्यं रुद्रो नादविमोहितः ॥१९॥ पतितान्यपि शस्त्राणि करेभ्यो न विवेद स
स॰॥ एकाग्रीभूतमालोक्य रुद्रो दैत्यो जलंधरः ॥२०॥ कामार्तः स जगामाशु यत्र गौरी
स्थिताभवत् ॥ युद्धे शुंभनिशुंभाख्यौ स्थापयित्वा महाबलौ ॥ दशदोर्दंडपंचास्यस्त्रि
नेत्रश्च जटाधरः ॥ महावृषभमारूढः स बभूव जलंधरः ॥ अथ रुद्रं समायांतमालो
क्य भववल्लभा ॥ अभ्याययौ सखीमध्यात्तद्दर्शनपथेभवत् ॥ यावद्ददर्श चार्वंगीं पा
र्वतीं दनुजेश्वरः ॥ तावत्स्ववीर्यममुचत्कूटांगश्चाभवत्तदा ॥२४॥ अथ तां त्वा तदा गौ

॥२७॰

रीदानवंभयविह्वला॥जगामांतर्हितावेगात्सातदोत्तरमानसं॥२६॥तामदृष्ट्वाततो
दैत्यःक्षणाद्विद्युल्लतामिव॥जवेनागात्पुनर्युद्धंयत्रदेवोवृषध्वजः॥पार्वत्यापिभयो
द्विग्नंसस्मारमनसातदा॥तावद्ददर्शनंदेवस्वरूपविष्टंसमीपगं॥२७॥ ॥पार्वत्युवाच
विष्णोजलंधरोदैत्यःकृतवान्परमद्भुतं॥नकिंनविदितंतेस्तिचेष्टितंतस्यदुर्मतेः॥
॥ ॥श्रीविष्णुरु०॥ ॥तेनैवदर्शितःपंथावयमप्यन्विष्यामहे॥२नान्यथासभवेद्वध्यः
पातिव्रत्यसुरक्षितेः॥३०॥जगामविष्णुरित्युक्त्वापुनर्जालंधरंपुरं॥अथरुद्रश्चगं
धर्वीःनुमतःसगरेस्थितः॥ ॥अंतर्द्धानगतांमायांदृष्ट्वासबुबुधेतदा॥३१॥ततःशि
वोविस्मितमानसःपुनर्जगामयुद्धायजलंधरंतथा॥सचापिदैत्यःपुरतोगतंशिवं
दृष्ट्वाशरौघैःसमवाकिरद्रणे॥३२॥ ॥इतिश्रीपद्मपुराणेकार्तिकमाहात्म्येपंच

को॰ पा॰
२८

ष्टोऽध्यायः॥ ॥नारद उवाच॥ ॥विष्णुर्जालंधरं गत्वा पुरं दैत्यगणावृतं॥ पातिव्रत्यस्य
भंगाय वृंदायाश्चाकरोन्मतिं॥१॥ अथ वृंदा रिकादेवी स्वप्नमध्ये ददर्श ह॥ भर्ता
रं महिषारूढं तैलाभ्यक्तं दिगंबरं॥२॥ कृष्णप्रसूनभूषाढ्यं क्रव्यादगणसेवितं॥ द
क्षिणाशामुखं मुंडं तमसाच्छावृतं तदा॥३॥ स्वपुरं सागरे मग्नं सहसैवात्मना सह॥४
तः प्रबुद्धा सा बाला तदा स्वप्नं विचिन्वती॥ ददर्शोदितमादित्यं सच्छिद्रं निःप्रभं मुहुः॥ त
दनिष्टमिति ज्ञात्वा रुदती भयविह्वला॥१५॥ कुत्रचिन्नालभच्छर्म गोपुराट्टालभूमिषु॥
ततः सखीद्वययुता नगरोद्यानमागमत्॥६॥ तत्रापि सा भ्रमन् बाला नालभत्कुत्रचि
त्सुखं॥ वनाद्वनांतरं याता नात्मानं प्रविवेद सा॥७॥ ततः सा भ्रमती बाला ददर्शाति
विभीषणौ॥ राक्षसौ सिंहवदनौ दंष्ट्रानयनभासुरौ॥ तौ दृष्ट्वा विह्वलातीव पलायनपरा

॥२८॥

स्यवत् ॥ मुनेर्मां रक्ष शरणमागतामित्यभाषत ॥१०॥ मुनिस्तां विह्वलां दृष्ट्वा राक्षसानुगतां
तदा ॥ हुंकारे तौ वतौ घोरौ चकार विमुखो तदा ॥ तद्धुंकारभयात्रस्तौ राक्षसौ विमुखौ ततौ ॥
प्रणम्य दंडवद्भूमौ वृंदा वचनमब्रवीत् ॥१२॥ ॥ वृंदोवाच ॥ ॥ रक्षिताहं त्वया घोराद्भया
दस्मात्कृपानिधे ॥ किंचिद्विज्ञप्तुमिच्छामि कृपया श्रुणुत द्विजः ॥ जलंधरो हि तद्भर्त्ता रुद्र
योद्धुं गतः प्रभो ॥ स तत्रास्ते कथं युद्धे तन्मे कथय सुव्रत ॥ ॥ नारद उ० ॥ ॥ मुनिस्तद्वाक्य
माकर्ण्य कृपयोर्ध्वमवैक्षत ॥ तावत्कपी समायातौ तं प्रणम्याग्रतः स्थितौ ॥१५॥ शिरः
कबंधहस्तौ तौ दृष्ट्वा स्वितनयस्य सा ॥ पपात मूर्छिता भूमौ भर्तृव्यसनदुःखिता ॥१६॥ क
मंडलूदकैः सिक्ता मुनिनाश्वासिता तदा ॥ स्वाभर्तृभालं साभाले कृत्वा दीनाररोद ह ॥१७॥
यः सुरासुरसंवादे विनोदयसि मां प्रभो ॥ कथं स नवदस्यैव वल्लभां मामनागसां ॥ येन
देवाः सगंधर्वाः निर्जिता विष्णुना सह ॥ स कथं तापसेनापि त्रैलोक्यविजयी हतः ॥१९

का॰ प॰
॥२५॥

॥ नारद उवाच ॥ इति दित्ये निर्मुक्ता वृंदा संमुदिता वचनमब्रवीत् ॥ वृंदोवाच ॥ कृपानिधे मुनिश्रेष्ठ जीवयैनं मम प्रियं ॥ त्वमेवास्य पुनः शक्तो जीवनाय मतो सि मे ॥ २१ ॥ ॥ नारद उवाच ॥ इत्युक्त्वांतर्दधे विप्रस्तावत्सागरनंदनः ॥ वृंदामालिंग्य तद्वक्त्रं चुचुंब प्रीतमानसा ॥ २४ ॥ अथ वृंदापि भर्तारं दृष्ट्वा संहृष्टमानसा ॥ रेमे तद्वनमध्यस्था तद्युक्ता बहुवासरं ॥ कदाचित्सुरतस्यांते दृष्ट्वा विष्णुं तमेव हि ॥ निर्भर्त्स्य क्रोधसंयुक्ता वृंदा वचनमब्रवीत् ॥ २६ ॥ वृंदोवाच ॥ धिकृते देहं हरे शीलं परदाराभिगामिनः ॥ ज्ञातो सि त्वं मया सम्यक् मायीप्रछिन्नमानसः ॥ यौ त्वया मायया दौतौ स्वकीयौ दर्शितौ मम ॥ तौ वै राक्षसौ भूत्वा तव भार्यां हरिष्यतः ॥ २८ ॥ त्वं चापि भार्यादुःखार्तो वने कपिसहायवान् ॥ भव सर्पेश्वरेणायं यस्ते शिष्यत्वमागतः ॥ इत्युक्त्वा सा तदा वृंदा प्राविशद्धव्यवाहनं ॥ विष्णुना वार्यमाणापि तस्मिन्नासक्तमानसा ॥ २१ ॥ ततो हरिस्तामनुसंस्मरन्मुहुर्वृं

दान्विता स स्मरजोवगुंठितः॥ तथैव तस्थौ सुरसिद्धसंघैः प्रबोध्यमानोपि यथैन शांतिं॥३४॥
॥ इति श्रीपद्म॰ कार्त्तिकमाहात्म्ये षोडशोऽध्यायः॥ ॥नारद उ॰॥ ॥ततो जलंधरो
दृष्ट्वा रुद्रमद्भुतविक्रमं॥ चकार मायया गौरीं त्र्यंबकं मोहयंस्तदा॥१॥ रथोपरि गतां बद्धां रुद
तीं पार्वतीं शिवः॥ निशुंभशुंभयोर्दैत्यैः स ददर्श निजं ततः॥२॥ गौरीं तथाविधां दृ
ष्ट्वा शिवोप्युद्विग्नमानसः॥ अवाङ्मुखस्थितस्तस्थौ विस्मृत्य स्वं पराक्रमं॥३॥ ततो जलं
धरो वेगाच्छित्त्वा दिव्यास्त्रसायकैः॥ आपुंखमग्नैस्तं रुद्रं शिरस्युरसि चोदरे॥४॥ ज्ञातवा
न्स्वसतीं मायां विज्ञानेन प्रबोधितः॥ रौद्ररूपधरो जातो ज्वालामालातिभीषणः॥५॥ त
स्यातीव महारौद्रं दृष्ट्वा रूपं महासुराः॥ नशेकुः संमुखं स्थातुं भेजिरे ते दिशो दश॥६॥ ततः
शापं ददौ रुद्रस्तयोः शुंभनिशुंभयोः॥ यु[illegible]तौ योद्धुं गौर्या वध्यौ भविष्यतः॥

॥का.मा॥
॥३०॥

पुरर्जलंधरो वेगाद्ददर्श निशितैः शरैः॥बाणौघकान्समं छिन्नं यथाभूत्तद्विलं महत्।९
यावद्रुद्रः अचिच्छेद तस्य बाणगणांस्त्वरात्॥तावत्स परिघेणाशु जघान वृषजं बली।१०
वृषस्तेन प्रहारेण परावृत्तो रणांगणात्॥रुद्रेण कृष्यमाणोपि न तस्थौ रणभूमिषु॥तत
परं तु संक्रुद्धो रुद्रो रौद्रवपुर्धरः॥चक्रं सुदर्शनं वेगाद्विक्षेपादित्यवर्चसं॥११॥प्रहसं
न्नोदसौ वेगात्तदा सा च जलंधरं॥जहार तच्छिरः कायान्महदायातलोचनं॥१२॥र[illegible]
क्तौघः पपात तस्य नादयन्वसुधातलं॥तेजश्च निर्गतं देहात्तद्रुद्रे लयमागमत्॥वृंदादे
होद्भवं तेजस्तद्गौर्यां लयमागतं॥अथ ब्रह्मादयो देवा हर्षोत्फुल्लविलोचनाः॥१४॥प्रणं
म्य गिरिस्मारुद्रं शंभुं मुर्विद्दुवेष्टितं॥१५॥ ॥देवा ऊचुः॥ ॥महादेव त्वया देव रक्षिताः
शत्रुजाद्भयात्॥किंचिदन्यत्समुद्भूतं तत्राकिं करवामहे॥१६॥वृंदालावण्यसंभ्रां

॥रा.म॥
॥३०॥

तोविष्णुस्तिष्ठतिमोहितः॥ ॥ईश्वरउ०॥ ॥गछध्वंशरणंदेवाविष्णोमोहापनुत्तये॥१७॥श
रण्यंमोहिनीमायांसांवः कामंप्रदास्यति॥ १८॥ ॥नारदउ०॥ ॥इत्युक्त्वांतर्दधेदेवःसाऽभक्त
गणैस्तदा॥ देवाश्चतुष्टुवुर्मूलप्रकृतिंभक्तवत्सलां॥१९॥ ॥देवाऊचुः॥ ॥यदुद्भवाःसत्व
रजस्तमोगुणाःसर्गस्थितिध्वंसनिदानकारणाः॥ यदिच्छयाविश्वमिदंभवाभवौतनोति
मूलप्रकृतिंनतास्मतां॥२०॥ याहित्रयोविंशतिभेदसंज्ञिताजगत्यशेषेणसमास्थिताप
रा॥ तद्रूपकार्पण्यजडास्त्रयोपितेवापिमूलप्रकृतिंनतास्मतां॥२१॥ ॥यद्भुक्तमुक्ताःपुरुषा
स्तुनित्यंदारिद्र्यभीमोहपराभवादीन्। नप्राप्नुवंत्यवहिभक्तवत्सलांसदेवमूलप्रकृतिंनता
स्मतां॥२२॥ ॥नारदउवाच॥ ॥स्तोत्रमेतत्त्रिसंध्यंयःपठेद्वाश्रमानसः। दारिद्र्यादेह
दुःखानिनस्यंतिकदाचिते॥ ॥इत्थंसंस्तुवतःस्तेदेवास्तेजोमंडलमंडितं॥ददृशुर्गगनेतत्रज्या

व्याप्या स्वदिगंतरं ॥ तन्मध्यां भारतीं सर्वे शुश्रुवुर्व्योमचारिणीं ॥२९॥ देव्युवाच ॥ ॥ अहं देव
त्रिधा भिन्नातिष्ठामि त्रिविधैर्गुणैः ॥ गौरी लक्ष्मीः स्वरा चेति रजःसत्वतमोगुणाः ॥ तत्र
गच्छत ताः कार्यं विधास्यत्येव वः सुराः ॥ ॥नारद उ०॥ ॥एतावतामितिमां वाचैमंतर्धानम
गान्महः ॥ देवानां विस्मयोत्फुल्लनेत्राणां तत्क्षान्नृप ॥३०॥ ततः सर्वैपि ते देवा गत्वा तद्वा
क्यनोदिताः ॥ गौरीं लक्ष्मीं स्वरां चैव प्रणेमुर्भक्तितत्पराः ॥ तानागतान्सुरान्दृष्ट्वा प्रोचुस्ताश्च
भक्तवत्सलाः ॥ बीजानि प्रददुस्तेभ्यो वाक्यानि चेतदोचिरे ॥ इमानि तावद्बीजानि विष्णुर्यत्रै
व तिष्ठति ॥ निर्वपंतु ततः कार्यं भवतां सिद्धिमेष्यति ॥ ॥नारद उ०॥ ॥ततस्ते हरि
सुरसिद्धसंघाः प्रगृह्य बीजानि विचिक्षिपुश्च ॥ वृंदाविताभ्रमितत्केसयत्र विष्णुः सदा
तिष्ठति सौख्ययुक्तः ॥३४॥ ॥इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये सप्तदशोध्यायः ॥ ॥

नारदउवाच॥ ॥क्षिप्तेभ्यस्तत्र बीजेभ्यो वनस्पत्यस्त्रयोभवंन्॥ धात्रीचमालती चैव तुलसी
च नृपोत्तम १॥ स्वरोद्भवा स्मृता धात्री माभवा मालती स्मृता॥ गौरीभवा च तुलसी तमः सत्व
रजोगुणाः॥ स्त्रीरूपिण्यो वनस्पत्यो दृष्ट्वा विष्णुस्तदा नृप॥ उदतिष्ठन्माद्धंदा रूपातिशा
यविभ्रमः॥ दृष्टाश्च तेन ता रागात्कामासक्ते न चेतसा॥ तं चापि तुलसी धात्र्यो रागेणैवाभि
श्यतः॥ यस्माल्लक्ष्म्या पुरा बीजं मीर्ष्ययैव समर्पितं॥ तस्मात्तदुद्भवा नारी तस्मान्नीर्ष्योपराभ
वत्॥ अतः सा बर्बरीत्याख्यामवापातीव गार्हितां॥ धात्रीतुलस्यो तद्रागात्तस्य प्रीतिप्रदे
तदा॥ ततो विस्मृतदुःखोसौ विष्णुस्ताभ्यां सहैव तु॥ वैकुंठमगमत्तुं सर्वदेवनमस्कृता॥
कार्त्तिकोद्यापने विष्णोस्तस्मात्पूजा विधीयते॥ तुलस्यामूलदेशे तु प्रीतिदा सा यतः स्मृता॥
तुलसीकाननं राजन्गृहे यस्यावतिष्ठति॥ तद्गृहं तीर्थभूतं तु नायांति यमकिंकराः॥ ॥ सर्व

पापहरं दिव्यं कामदं तुलसीवनं ॥ रोपयंति नरश्रेष्ठास्तेन पश्यंति भास्करिं ॥ १० ॥ दर्शनं नर्मदा
यास्तु गंगास्नानं तथैव च ॥ तुलसीवनसंसर्गः सममेतत्त्रयं स्मृतं ॥ ११ ॥ रोपणात्पालनात्से
काद्दर्शनात्स्पर्शनान्नृणां ॥ तुलसी दहते पापं वाङ्मनःकायसंचितं ॥ तुलसीमंजरीभि
र्यः कुर्याद्धरिहरार्चनं ॥ न स गर्भगृहं याति मुक्तिभागी न संशयः ॥ १३ ॥ पुष्कराद्यानि ती
र्थानि गंगाद्याः सरितस्तथा ॥ वासुदेवादयो देवास्तिष्ठंति तुलसीदले ॥ १४ ॥ तुलसीमं
जरीभिर्यो युक्तः प्राणान्विमुंचति ॥ यमोपि नेक्षितुं शक्तो युक्तं पापशतैरपि ॥ १५ ॥ तुलसी
काष्ठजं यस्तु चंदनं धारयेन्नरः ॥ तद्देहं न स्पृशेत्पापं क्रियमाणमपि क्वचित् ॥ १६ ॥ तुलसी
विपिनच्छायां पत्रस्थाने भवेन्नृप ॥ तत्र श्राद्धं प्रकर्तव्यं पितॄणां दत्तमक्षयं ॥ १७ ॥ धात्री
छायासु यः कुर्यात्पिंडदानं नृपोत्तम ॥ धत्ते धात्रीफलं यस्तु स विज्ञेयो हरिः स्वयं ॥ १८ ॥

धात्रीफलं च तुलसीमृत्तिका द्वारकोद्भवा ॥ यस्य देहे स्थिता नित्यं स जीवन्मुक्त उच्यते ॥
धात्रीफलैस्तासंमिश्रैस्तुलसीपत्रसंयुतैः ॥ जलैः स्नाति नरस्तस्य गंगास्नानफलं स्मृ
॥२०॥ देवार्चनं नरः कुर्याद्धात्र्याः पत्रैः फलैस्तथा ॥ सुवर्णैर्मणिमुक्ताद्यैरर्चनस्याप्नुयात्फ
लं ॥२१॥ तीर्थानि मुनयो देवा यज्ञाः सर्वेपि कार्त्तिके ॥ नित्यं धात्रीं समाश्रित्य तिष्ठंत्यर्के तु
लास्थिते ॥ द्वादश्यां तुलसीपत्रं फलं धात्र्याश्च कार्त्तिके ॥ लुनाति पुरुषो गच्छेन्निरयानतिग
र्हितान् ॥ धात्रीछायां समाश्रित्य कार्त्तिकेन्नं भुनक्ति यः ॥ अन्नसंसर्गजं पापमा देहे तस्य न
श्यति ॥२४॥ धात्रीमूले च यो विष्णुं कार्त्तिके ह्यर्चयेन्नरः ॥ विष्णुक्षेत्रेषु सर्वेषु तेन विष्णुः सु
पूजितः ॥ धात्रीतुलस्योर्माहात्म्यमपि देवश्चतुर्मुखः ॥ न समर्थो भवेद्वक्तुं यथा देवस्य शा
र्ङ्गिणः ॥२६॥ धात्रीतुलस्युद्भवकारणां यः करोति यः श्रावयते च मर्त्त्या ॥ विधूतपापः

सह सर्वैर्जैस्तु स्वर्गं ययौ तस्याग्रविमानसंस्थः ॥२७॥ इति कार्तिकमाहात्म्ये अष्टादशो
ध्यायः ॥ ॥ पृथुरु० ॥ सेतिहासमिदं ब्रह्मन् माहात्म्यं कथितं त्वया ॥ अस्याश्च पे करं
स्याद्वृ रहुलस्यात्तत्कृतं मया ॥१॥ यदूर्जव्रतिनः पुंसः फलं महदुदाहृतं ॥ तत्पुनः श्रीहरिर्मौल
स्यं तेन कीर्त्तिमिदं कथं ॥२॥ श्रीनारद उ० ॥ आसीत्सह्याद्रिविषये करवीरपुरे शुभे
॥ ब्राह्मणो वैदिकः कश्चिद्धर्मदत्तेति विश्रुतः ॥ विष्णुव्रतकरः शश्वद्विष्णुपूजारतः सदा
द्वादशाक्षरविद्यां च जपमानोतिथिप्रियः ॥ कदाचित्कार्तिके मासि हरिजागरणाय
सः ॥ रात्र्यां तुर्यांशशेषायां जगाम हरिमंदिरं ॥४॥ हरिपूजोपकरणं गृह्य स व्रजन्नात्तदा
तेन दृष्टा तु सा यांती राक्षसी भीमनिस्वना ॥ वक्रदंष्ट्रा वलज्जिह्वा निमग्नारक्तलोचना ॥ दि
गंबरा शुष्कमांसा लंबोष्ठी घर्घरस्वरा ॥ तां दृष्ट्वा भयवित्रस्तः कंपिताद्वयपायवः ॥६॥ पूजो

करतौ वैगात्पयो भिष्ठ्वा हनडथात् ॥ संस्मृत्य यद्धरेर्नाम तुलसीमिश्रवारिणा ॥ सोहनत्पातक
तस्मात्तस्याः सर्वमगाल्लयं ॥ ९ ॥ अथ संस्मृत्य सा पापं सर्वजन्मविपाकजं ॥ स्वां दशामथ वीक्ष्य
प्रं दंडवच्च प्रणम्य सा ॥ १० ॥ ॥ कलहोवाच ॥ सर्वकर्मविपाकेन दशामेतां गतास्म्यहं ॥ तत्कथं
तु पुनर्विप्र यास्याम्युत्तमगतिं शुभां ॥ ११ ॥ ॥ नारद उ० ॥ ॥ तां दृष्ट्वा प्रणतामग्रे वदमानां स्वकर्म त
त् ॥ अतीव विस्मितो विप्रस्तदा वचनमब्रवीत् ॥ १२ ॥ ॥ धर्मदत्त उ० ॥ ॥ केन कर्म विपाकेन
त्वद्दशामीदृशींगता ॥ कुतस्त्वं का च किंशीला तत्सर्वं कथयस्व मे ॥ १३ ॥ ॥ कलहोवाच ॥ ॥ सौ
राष्ट्रनगरे ब्रह्मन् भिक्षुर्नामाभवद्द्विजः ॥ तस्याहं गृहिणी पूर्वं कलहाख्यातिनिष्ठुरा ॥ नकदा
चिन्मया भर्तुर्वचसापि शुभं कृतं ॥ नार्पितं तस्य मिष्टान्नं भर्तुर्वचनहेलया ॥ १५ ॥ कलहप्रिय
यानित्यं मनोद्विग्नमनायदा ॥ परिणेतुं तदान्यां स मतिं चक्रे मतिर्मम ॥ १६ ॥ ततो गरलमादा

॥का॰मा॰॥
॥२४॥

यथाणांत्स्व ह्यामया द्विज ॥ अथ बध्वा विविनुर्णीनथ्यमाना यमानुगाः ॥१७॥ यमस्याग्रं तद
दृष्ट्वा चित्रगुप्तमपृच्छत ॥ यम उवाच ॥ अनया किं कृतं कर्म चित्रगुप्त विलोकय ॥१८॥
प्राप्नोत्येषा च तत्कर्मफलं शुभमथाशुभं ॥१९॥ चित्रगुप्त उवाच ॥ अनया तु कृतं क
र्म शुभं किंचिन्न विद्यते ॥ मिष्टान्नं भुज्यमाने यं न भर्त्रे यं तदर्पितं ॥२०॥ अतश्च वल्गुर्व
योन्यां स्वविष्ठादा च तिष्ठतु ॥ भर्तवादात्सदा ह्येषा नित्यं कलहकारिणी ॥२१॥ विष्ठाद
स्त्करी योन्यां तस्मात्तिष्ठत्वियं प्रभो ॥ पाकभांडे सदा भुंक्ते एषा गुप्तमितस्ततः ॥२२॥
तस्मादियं बिडाला तु स्वजनापत्यभक्षिणी ॥ भर्तारमपि चोद्दिश्य ह्यात्मघातः कृतोभै
कैग्रतः ॥२३॥ तस्मात्स्वेतच्छरीरे पि तिष्ठैषा विनिंदिता ॥ अतश्चैषा कुतुदंशं स्थापितव्या
फाटैर्विभो ॥२४॥ ततः प्रेतशरीरस्याह्विरंति छलियां ॥ — — ऊर्ध्वयोनित्रयं चैषानु

॥२४॥

न कृतं शुभकारिणी ॥२५॥ कलहोवाच ॥ सोहं पंचाशद्वर्षाणि जाता ईदृक्स्थिता तदा ॥ क्षुत्तृष्णा-
स्पं पीडिता नित्यं स्वेयं दुःखिता स्वेन कर्मणा ॥ ततः क्षुत्पीडितारंण्ये वणिग्भिः सह संगता ॥ आगता
दक्षिणं देशं कृष्णावेण्यास्तु संगमं ॥२६॥ ततोहं संस्थिता यावत्तावत्तस्मात्तु दूरतः ॥ आगतः शि-
वं शिवगणैर्दूरमयाकृष्टा बलादहं ॥२७॥ ततः सुस्नान्मया दृष्टो ब्रह्मंस्त्वं हि द्विजोत्तमा । त्वद्द-
त्तं तु तुलसीवारिसंसर्गगतपापया ॥ तत्कृपां कुरु विप्रेंद्र कथं मुक्तिं प्रयास्य हं ॥ योनित्रयाद्द्र-
भाव्यादस्माच्च प्रेतदेहतः ॥२८॥ इत्थं निशम्य कलहावचनं द्विजाग्र्यस्तत्कर्मपाकजनि-
तभयजातदुःखः ॥ तत्कष्टनिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वा चिरं स च वचनं निजगाद दुःखा-
र्त्तः ॥२९॥ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये एकोनविंशोध्यायः ॥ ॥ धर्मदत्त उ० ॥
विलयं यांति पापानि तीर्थदानव्रतादिभिः ॥ प्रेतदेहस्थितायास्ते तेषु नैवाधिकारिता ॥ प

त्वद्ग्लानिदर्शनादस्मात्खिन्नं च मम मानसं ॥ दैवल्लिईति मयाप्नि त्वामनुवृत्य दुःखितां ॥ २
पातकं वत वाल्यजं येन घोरमिदं येन पापकं जातं ॥ न वाल्पैः क्षीयते पुण्यैः व्रतत्वं चातिगर्हितं ॥ ३
तस्मादाजन्मितं यत्त्वं यन्मया कार्त्तिकव्रतं ॥ तस्य पुण्यस्यार्धभागेन सद्गतिं च त्वमाप्नुहि ॥ ४ ॥ का
र्तिकव्रतपुण्येन न साम्यं यान्ति सर्वथा ॥ यज्ञदानानि तीर्थानि व्रतान्यपि तथाध्वरैः ॥ ५ ॥ ना
रद उ० ॥ इत्युक्त्वा धर्मदत्तोसौ यावत्तामभ्यषेचयत् ॥ तुलसीमिश्रतोयेन श्रावयन्
द्वादशाक्षरीं ॥ तावत्प्रेतत्वनिर्मुक्ता ज्वलदग्निशिखोपमा ॥ दिव्यरूपधरा जाता लावण्ये
न यथेंदिरा ॥ ७ ॥ ततः सा दंडवद्भूमौ प्रणनामाथ तं द्विजं ॥ उवाच च ततो वाक्यं हर्षगद्गदया
गिरा ॥ ८ ॥ कलहोवाच ॥ त्वत्प्रसादाद्द्विजश्रेष्ठ विमुक्ता निरयादहं ॥ पापाब्धौ मज्ज
मानाया त्वं नौर्भूतोसि मे ध्रुवं ॥ ९ ॥ नारद उ० ॥ इत्थं सा वदती विप्रं ददर्शागतमं

वरात् ॥ विमानहंससंयुक्तं विष्णुरूपधरैर्गतौ ॥ १० ॥ अथ सा तद्विमानाग्र्यं गतौरध्यवरोहि
ता ॥ पुण्यशीलसुशीलाभ्यामप्सरोगणसेवितं ॥ तद्विमानं तदा पश्यन् धर्मदत्तः सविस्म
यः ॥ पपात दंडवद्भूमौ तौ दृष्ट्वा विष्णुरूपिणौ ॥ १२ ॥ पुण्यशीलसुशीलौ च समुत्थाप्यान
तं द्विजं ॥ समभ्य॰नंदयद्वाक्यैर्मृदुतुर्धर्मसंमितं ॥ १३ ॥ ॥ गणावूचतुः ॥ ॥ साधु साधु द्वि
जश्रेष्ठ यस्त्वं विष्णुरतः सदा ॥ दीनानुकंपी धर्मज्ञो विष्णुव्रतपरायणः ॥ य्या बाल्ये च निर्मि
ह्येतघलया कार्तिकव्रतं ॥ हृतं तस्यार्द्धभागेन पुण्ये द्वैगुण्यमागतं ॥ १५ ॥ त्वत्पुण्यस्यार्द्ध
भागेन यदस्याः पूर्वसंचितं ॥ जन्मांतरशतोद्भूतं पापं यद्विलयं गतं ॥ १६ ॥ स्नानेनैव गतं पा
पं यदस्याः पूर्वकर्मजं ॥ हरिजागरणाद्येन विमानमिदमास्थिता ॥ १७ ॥ वैकुंठं नीयते सा
धो नानाभोगयुता प्रभो ॥ दीपदानस्तवैः पुण्यैस्तेनेलं रूपमास्थिता ॥ १८ ॥ तुलसीपूजना

यैश्च कार्त्तिकव्रतकैः शुभैः॥ विष्णुकान्तिर्यथा जाता त्वया दत्तैः कृपालुना॥ त्वमप्यस्य भव
स्याते भार्याभ्यां सह यास्यसि॥ वैकुंठभवनं विष्णोः सान्निध्यं च सरूपतां॥ ते धन्याः कृतकृत्या
स्ते तेषां च सफलो भवः॥ यैर्भक्त्याराधितो विष्णुः धर्मदत्त यथा त्वया॥ २१॥ सम्यगाराधितो वि
ष्णुः किं न यछति देहिनां॥ औत्तानचरतो येन ध्रुवत्वे स्थापितः पुनः॥ २२॥ यन्नामस्मरणा
द्देव देहिनो यांति सद्गतिं॥ ग्राहग्रहीतो नागेंद्रो यन्नामस्मरणात्पुरा॥ २३॥ विमुक्तः सन्निधिं
प्राप्तो जातोयं जयसंज्ञकः॥ अतस्त्वयार्चितो विष्णुस्त्वां सान्निध्यं प्रयास्यति॥ २४॥ बहून
ब्दसहस्राणि भार्याद्वययुतस्य ते॥ ततः पुण्यक्षये जाते तत्रायास्यसि भूतले॥ २५॥ सूर्य
वंशप्रभवो राजा विख्यातस्त्वं भविष्यसि॥ नाम्ना दशरथस्तत्र भार्याद्वययुतः पुनः॥ २६॥ तृ
तीयया न या वापि ते पुण्यार्द्धभागिनी॥ तत्रापि तव सान्निध्यं विष्णुर्यास्यति भूतले॥ आत्मा

नं तव पुत्रत्वे प्रकल्प्यामरैः कार्यं कृतं। तव जन्म श्रुता दत्तो हित्वसंतुष्टिकारकात् ॥२८॥ नद-
शानचदानानि न तीर्थान्यधिकानि ते ॥२९॥ व्यासोसि विप्राग्र्य यतस्त्वयैतद्भुते जगत्तुष्टिकरं
जगद्गुरोः ॥ यदर्घभागस्य फलान्मुरारेः प्राप्तीयते क्रोडिरियं सलोके ॥३०॥ इति कार्तिक
माहात्म्ये एविंशतितमोध्यायः ॥ ॥ इत्थं तद्वचनं श्रुत्वा धर्मदत्तः सविस्मयः। प्रणाम्य दंडव
द्भूमौ वाक्यमेतदुवाच ह ॥१॥ धर्मदत्त उवाच ॥ ॥ ह्याराधयंति सर्वेपि विष्णुभक्ता जनार्दनं ॥
यज्ञैर्दानैर्व्रतैस्तीर्थैस्तपोभिश्च यथाविधि ॥ विष्णुप्रीतिकरं तेषां किंचित्सांनिध्यकारकं ॥
यत्कृत्वा तानि चीर्णानि सर्वाण्यपि भवंति हि ॥२॥ गणा ऊचतुः ॥ ॥ साधु पृष्टं त्वया विप्र
शृणु चैकाग्रमानसः ॥ सेतिहासं कथ्यामत्र मथ्यमानं पुराभवां ॥३॥ कांतीपुर्यां पुरा चोलश्चक्र
वर्ती नृपोभवत् ॥ यस्य नाम्नैव ते देशाश्चोलाख्या ह्यभवन्भुवि ॥ यस्मिन्छासति भूचक्रं दरि

॥का॰मा॥
॥२७॥

द्रोवातिदुःखितः॥ पापबुद्धिः सुरूग्वापि दैवकस्मिंद्दमल्काः॥६॥ तस्याप्यनंतरं तस्य तात्प
र्णीतिदावुभौ॥ सुवर्णधूपैः शोभाढ्यावास्तांचैवरथोपमौ॥७॥ सकदाचिद्दगाङाग्रा ह्यनंतर
परं द्विज॥ यत्रास्तिजगतांनाथो योगनिद्रामुपागतः॥ तत्रश्रीरमणंदेवं संप्रस्य विधिवन्नृपः
॥ नतिमुक्ताफलैर्दिव्यैः स्वर्णपुष्पैश्चशोभनैः॥ प्रणम्य दंडवच्चाव द्रुपविष्टः सतत्रवै॥ ताव
द्ब्राल्लणा मार्थां तमपश्यदेवसंनिधौ॥ देवार्चनार्थमायांतं तुलस्युदकपाणिकं॥ स्वपुरावासि
नं तत्र वि॰॰ष्णुदासाख्यं द्विज॥११॥ तत्राभ्येत्यच देवर्षिर्दवदेवमपूजयत॥ विष्णुसूक्तेनसंस्ना
प्य तुलसीमंजरीदलैः॥१२॥ तुलसीपूजयातस्य रत्नपूजावृता पुरा॥ आच्छादितासमा
लोक्यराजाक्रुद्धोभवीद्द्विजं॥१३॥ ॥ चोलचक्रवर्त्युवाच॥ ॥ माणिक्यस्वर्णपूजाश्रीशोभा
व्योपाकृतामया॥ विष्णुदासकथं सोद्यमाच्छिन्ना तुलसीदलैः॥ विष्णुभक्तिं न जानासि व

॥२७॥

राकोसिमतोमम॥ यदिमामतिशेषाद्योहज्ञामाक्षोदयस्वहो॥१५॥ इतितद्वचनंश्रुत्वास
क्रोधःसद्विजोत्तमः॥ राज्ञोगौरस्वमुक्ष्यघ्य[illegible]गादवचनंतदा॥१६॥ ॥विष्णुदासउवाच॥ ॥
राजन्भक्तिंनजानासिगर्वितोसिनपश्रिया॥ किंवाविष्णुव्रतंचीर्णंत्वयाहंवैवदस्वतत्॥
गणाऊचतुः॥ ॥तद्ब्राह्मणवचःश्रुत्वाप्रहस्यनृपसत्तमः॥ विष्णुदासंतदागर्वाद्दुवाच
वचनंतदा॥१८॥ ॥राजोवाच॥ ॥इत्थंवदसिचेद्विप्रविष्णुभक्त्यातिगर्वितः॥ भक्तिः
कियतीविष्णोर्दरिद्रस्याधनस्यच॥१९॥ यज्ञदानादिकंनैवविष्णोस्तुष्टिकरंकृतं॥ ना
पिदेवालयंविप्रकृतंसर्वंत्वयाक्वचित्॥२०॥ ईदृशस्यापितेगर्वएषईश्वरभक्तितः॥ त
कृत्वंतुवचोमेघसर्वेप्यतेद्विजोत्तमाः॥ रमाब्रह्मादिवंद्यस्यत्रिलोकीवरदस्यच॥ सवैष्ण
वंतुपूजायामाहात्म्यमधुनावयोः॥२२॥ ॥गणाऊचतुः॥ ॥इत्युक्त्वासनृपोगच्छन्निजम

जगृहे द्विजः ॥ आरंभे दैत्यवंसज्ञे लब्ध्वाचार्यं तु मुङलं ॥२३॥ ऋषिसंघसमाजुष्टे चक्रतीर्थव
हु दक्षिणां ॥ ब्रह्मणाञ्च कृतं यद्वत्तगयादि ऐपुरा द्विज ॥२४॥ विष्णुदासोपि तत्रैव तस्थौ देवा
लये व्रती ॥ पंचैतान्नियमान् कुर्वन् विष्णुतुष्टिकरान्सदा ॥२५॥ शाकयोर्जपो व्रतं सम्यक्कु तुल
सीकाननंवनं ॥ एकादशीजपस्तद्वत् द्वादशाक्षरविद्यया ॥२६॥ उपचारैः षोडशभिर्नृ
त्यगीतादिमंगलैः ॥ नित्या विष्णोस्तथा पूजा करोद्वै व्रतपंचकं ॥२७॥ नित्यजं स्मरणं वि
ष्णोर्गच्छन्भुंजन्स्वपन्नपि ॥ सर्वभूतस्थितं विष्णुं ध्यायन्वै समदर्शनः ॥ माघकार्त्ति
कयोर्नित्यं विशेषाद्व्रतसिद्धये ॥ ॐकारी विष्णुतुष्ट्यर्थं मुद्यापनविधिं तदा ॥२८॥ एवं
समाराधयतोः श्रियःपतिं तयोः स्वचोलेश्वरविष्णुदासयोः ॥ अगादनेहा बहुलस्तदा तस्थ
योस्तं निश्चसर्वेंद्रियकर्मणोस्तदा ॥३०॥ ॥ ॥इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये

॥३८॥

एकविंशोध्यायः ॥ ॥ गणाउचतुः ॥ कदाचिद्द्विजस्तु दासीयः कृत्वा नित्यविधिं द्विजः ॥ पाककर्
र्म करोत्तावद्दहरत्कोप्यलक्षितः ॥ १ ॥ तमदृष्ट्वैव हर्तारं पुनः पाकं चकार सः ॥ सायंकालार्थं
मस्यासौ व्रतभंगभयाद्द्विजः ॥ २ ॥ द्वितीयं पाकमाहृत्याभ्यागते वैश्वदेवे द्विजे ॥ उपहर्तुं प्रवर्त्तते
यावत्तावत्कोप्याहरत्पुनः ॥ एवं सप्तदिनं पाकं तस्य कोप्यहरत्पुनः ॥ ततः स विस्मयः सोऽभू
मनस्येवं विचारयत् ॥ अहो नित्यं समभ्येत्य कः पाकं हरते मम ॥ क्षेत्रसंन्यासिनः स्नानम
त्राद्यं मम सर्वथा ॥ ५ ॥ पुनः पाकं विधायैव भुज्यते यदि नैव मया ॥ सायंकालार्थं नापि पा
त्यर्थं कथं भवेत् ॥ ६ ॥ यदि पाकं विधायैव भोक्ष्ये वं तु मया न तत् ॥ अनिवेद्य हरौ सर्वं वै
नैवेद्यं भुज्यते ॥ ७ ॥ उपोषितोहं सहसा तिष्ठाम्यत्र व्रते स्थितः ॥ तावद्ददर्श चांडालं पं क्षीणांग
रतो स्थितं ॥ क्षुत्क्षामं दीनवदनं किंचिद्दूर्वा वशीकृतं ॥ तमालोक्य द्विजाग्र्यो नर्हर्षपा
दिन्नामसत्तः ॥ विलोक्यान्नहरं विप्रो हि शीर्षोत्थाय धावत ॥ कथं त्वमत्ति भो हृसघृतमे

॥कार्त्ति॰॥
॥३९॥

ऽहाणभो॥ रथं भुवं तमालोक्य स विप्राग्र्य द्विलोकश्च॥ विमानादधावत द्रीत्यान्मूर्छितश्चापतद्भु
वि॥ भीतं समूर्छितं चापि दृष्ट्वा चैव द्विजाग्रणीः॥ वेगादुपेत्य कृपया वस्त्रांतैः समबीजयत॥१३
अथोत्थितं तमेवासौ विष्णुदासो व्यलोकयत॥ साक्षान्नारायणं देवं शंखचक्रगदाधरं॥ पी
तांबरं चतुर्बाहुं श्रीवत्सांककिरीटिनं॥ अतसीपुष्पसंकाशं कौस्तुभोरस्थलं विभुं॥१५॥ दृ
ष्ट्वा तं सात्विकैर्भावै राव्रतो द्विजसत्तमः॥ स्तोतुं चापि नमस्कर्तुं तदा नालं बभूव सः॥१६॥ अ
थ शक्रादयो देवास्तथैवाभ्याययुस्तदा॥ गंधर्वाप्सरसश्चाहं जगुश्चननृतुस्तथा॥१७॥ वि
मानशतसंकीर्णं देवर्षिगणसेवितं॥ गीतवादित्रनिर्घोषसं[illegible]नं तदभ्रवतदा॥१८॥ त
तो विष्णुः समालिंग्य सद्भक्तं सात्विकाव्रतं॥ सारूप्यमात्मनो दत्वा नयद्वैकुंठमंदिरं॥ विमा ॥३९॥
नवरसंस्थं तं गच्छंतं विष्णुसंनिधौ॥ दीक्षितश्चोलनृपतिर्विष्णुदासं ददर्श सः॥२०॥ वैकुंठभुव
नं यांतं विष्णुदासं विलोक्य सः॥ स्वगुरुं मुद्गलं वेगादिदं वचनमब्रवीत॥२१॥ यस्पर्द्ध

यामयाचैवं यज्ञदानादिकं कृतं । सविष्णुरूपधृग्विप्रो याति वैकुंठमंदिरं ॥ दीक्षितेन मया सम्य
क् सत्रेऽस्मिन् वैष्णवे त्वया ॥ हुतमग्नौ हुता विप्रा अन्नाद्यैः हृष्टमानसाः ॥२३॥ नैवेद्यापिस
मे देवः प्रसन्नो भवति ध्रुवं ॥ न तेनैव तस्य विप्रस्य साक्षात्कारं ददौ हरिः ॥२४॥ तस्माद्दानैश्च
यज्ञैश्च नैव विष्णुः प्रसीदति ॥ भक्तिरेव परं तस्य निदानं दर्शने विभो ॥२५॥ इत्युक्ता सा गि
नेयं त्वमभिषिच्य नृपासने ॥ आबाल्याद्दीक्षितो राजा ह्यपुत्रत्वमगात्ततः ॥२६॥ ततो द्यापि
च तद्देशे सदा राज्यपाशभागिनः ॥ स्वस्त्रीयाश्चैव जायंते तत्कुलावधिवर्त्तिनः ॥२७॥ यत्त्वदृ
टं ततोऽग्नेस्स वन्हिकुंडाग्रतः स्थितः ॥ चिरं चैव्याजहारासु विष्णुं संबोधयंस्तदा ॥२८॥ विप्रा
केलिस्थितां देहिन्मेध्या काम्यकर्मणा ॥ इत्युक्त्वारोपयत्तद्वन्हौ सर्वेषामेव पश्यतां ॥२९॥ मु
द्गलस्तु तदा क्रोधाच्छिखामुत्पाट्य स्वकां ॥ ततस्तु यापितज्ञोत्रे मुहूर्त्ताद्विनिःसृताभवन् ॥३०॥
तावदाविर्बभूव हि विष्णुः कुंडाग्नेस्तत्क्षणात्सलः ॥ तमालिंग्य विमानाग्र्यं समारोहयदच्युतः ॥

तमालिंग्यात्मसारूप्यं दत्वा वैकुंठमंदिरं ● तेनैव सह देवेशो जगाम त्रिदशार्चितः ॥३२॥ यो विष्णुदासः स
तु पुण्यशीलो यश्चोलभूपः स तु शीलनामा ॥ आवामुभौ तत्समरूपभाजौ द्वास्थौ कृतौ तेन रमाप्रियेण ॥
३३॥ ॥इति श्रीकार्तिकमाहात्म्ये द्वाविंशोध्यायः॥ ॥धर्मदत्त उवाच॥ ॥जयश्च विजयश्चैव विष्णोर्द्वा
स्थौ पुरा श्रुतौ ॥ किंतु ताभ्यां पुरा चीर्णं यस्मात्तद्रूपधारिणौ ॥१॥ ॥गणावूचतुः॥ ॥तृणबिंदोस्तु क
न्यायां देहवियां पुरा द्विज ॥ कर्दमस्य च दृष्ट्यैव पुत्रौ द्वौ संबभूवतुः ॥२॥ ज्येष्ठो जयः कनिष्ठोभूद्वि
जयश्चेति नामतः ॥ तस्यामेवाभवत्पश्चात्कपिलो योगधर्मवित् ॥३॥ जयश्च विजयश्चैव विष्णुभ
क्तौ सदा ॥ तन्निष्ठितेंद्रियग्रामौ धर्मशीलौ बभूवतुः ॥४॥ नित्यमष्टाक्षरीजाप्यौ विष्णुव्रतकारि
वुभौ ॥ साक्षात्कारं ददौ विष्णुस्तयोर्नित्यार्चनेन सदा ॥ मरुत्तेनाकदाचित्तौ वाहूतौ यज्ञकर्मणि॥
जग्मतुर्यज्ञकुशलौ देवर्षिगणपूजितौ ॥ जयस्तत्राभवद्ब्रह्मा याजको विजयोभवत् ॥ ततो यज्ञांते वि
धिं कृत्स्नं परिहर्णीं च चक्रतुः ॥ मरुत्तो वभृतस्नातस्ताभ्यां वित्तं ददौ बहु ॥ तत्समादाय तौ हृतौ जग्म
तुः स्वाश्रमं प्रति ॥ पजनायदभ्म विष्णोस्तत्पर्यौ तौ तदा मुनी ॥ तद्धने विभजंतौ तौ पस्पर्धाते परस्प

९ जयोब्रवीत्समोभागः क्रियतामितितत्रसः ॥ विजयश्चाब्रवीद्यद्यलुब्धंयेनतस्यतत्
१० ततोर्थपिजयः क्रोधाद्विजयंक्षुब्धमानसः ॥ गृहीत्वानददास्येतत्तस्माद्ग्राहोभवेतितं ॥
विजयस्तस्यतंशापंश्रुत्वासोप्यशपच्चतं ॥ मदध्मातोशायस्त्वंयस्तस्मान्मातंगतांव्रज ॥ ततद
चत्वलुर्विष्णुंदृष्ट्वानिर्याणवनेविभुं ॥ शापयोश्चनिवृत्तिंतावयाचेतांरमापतिं ॥१३॥ तावूचतुः
भक्तावावांकथंदेवग्राहमातंगयोनिगौ ॥ प्रविश्यावः पुनर्दैवतच्छायाविनिवर्त्यतां ॥१४॥ श्रीभ
गवानुवाच ॥ मद्भक्तयोर्वचोऽसत्यंनकदाचिद्भविष्यति ॥ मयापिनान्यथाकर्तुंशक्यतेतत्कथंचन
१५ प्रसादवचसास्तांसेह्याविमुक्तौप्यहंपुमा ॥ तथावकीषवाक्येनजातोलाभेप्यहंकिल ॥१६॥
तस्माद्युवामिमौशापावनुभूयस्वयंकृतौ ॥ लभेतांमत्पदंनित्यमित्युक्त्वांतर्दधेहरिः ॥१७॥ अ
गताडुवैतुः ॥ ततस्तौग्राहमातंगौयाभूतांगंडकीतटे ॥ जातिस्मरौतुतद्योन्यांनित्यंविष्णुव्र
तेस्थितौ ॥१८॥ कदाचित्सगजःस्नातुंकार्तिकेगंडकींगतः ॥ तावज्जग्राहतंग्राहःसंस्मरंन्

शापकारणं ॥ यग्राहग्रहीतोसौ नागः स स्मारश्रीपतिं तदा ॥ तावदाविरभूद्विष्णुः शंखचक्रग
दाधरः ॥२०॥ ततस्तौ ग्राहमातंगौ चक्रं क्षिप्त्वा समुद्धृतौ ॥ दत्वा च विष्णुसारूप्यं वैकुंठमनय
द्विभुः ॥२१॥ तदाप्रभृति तत्स्थानं हरिक्षेत्रमिति स्मृतं ॥ चक्रसंघर्षणाद्यस्मिन्ग्रावाणोपि हि लां
छिता ॥२२॥ ताविमौ विश्रुतौ तौ तु जयोविजयनामकौ ॥ नित्यं विष्णुप्रियौ द्वौ स्तौ पदृष्टौ यौ हि त्वया
द्विज ॥२३॥ अतस्त्वमपि धर्मज्ञ नित्यं विष्णुव्रते स्थितः ॥ त्यक्तमात्सर्यदंभोपि भवस्व समदर्शनः ॥
तुलामकरमेषेर्के प्रातस्नायी सदा भव ॥ एकादशीव्रतेतिष्ठरतुलसीवनपालकः ॥२४॥ ब्रा
ह्मणान्वैष्णवान्गाश्च विष्णुभक्त्या सदा भज ॥ मसूरिकाम्लारनालान्वृंताकान्यपि मा भज ॥
२६ ॥ एवं त्वमपि कुर्वाणो देहांते वैष्णवं पदं ॥२७॥ मोबिलं धर्मदत्त स्वभक्तौ व यथा वयं ॥ तवाज्ञम्
व्रतादस्माद्धि विष्णुर्दबलकारकात् ॥ न यज्ञानच दानानि न तीर्थान्यधिकानि वै ॥२८॥ धन्योसि
विप्राग्र्य यतस्त्वयैतद्व्रतं कृतं तुष्टिकरं जगद्गुरोः ॥ यद्धर्मभागात्तत्फलामुरारे प्रणीयते स्मा

निरियंसलोकतां॥२०॥ नारदउ०॥ इत्थंतौधर्मदत्तंतावुद्धृत्यविमानगौ॥ जग्मतुर्मुदितौदि
विष्णोर्धर्मदत्तोपितद्धृती॥ देहांतेवैष्णवस्थानंभार्याभ्यामन्वितोभ्यगात्॥२१॥ इतिहासमिमंपु
रातनंशृणुतेश्रावयतेचयःपुमान्॥ हरिसान्निधिकारिणीं मतिंलभतेसोह्यपयाजगद्गुरोः॥२२॥
॥ इतिश्रीपद्मपुराणे कार्त्तिकमाहात्म्ये जलंधरोपाख्याने त्रयोविंशोध्यायः॥ पृथुरुवाच॥
कृष्णवेणीनदायस्माच्छिवविष्णुतनोःपुरा॥ बलिकृग्रामीरालक्ष्मिंलुहान्निरस्तालक्षिताल
या॥१॥ प्रभावोयंतयोर्नद्योःकिंवाक्षेत्रस्यतस्यहि॥ तन्मेकथयधर्मज्ञविस्मयोत्रमहान्मम॥२॥
॥नारदउ०॥ कृष्णकृष्णतनुःसाक्षाद्वेणीदेवोमहेश्वरः॥ तत्संगमप्रभावंतुनालंवक्तुंचतुर्मुखः।
तथापितत्समुत्पत्तिंकीर्तयिष्यामितांशृणु॥ चाक्षुषस्यांतरेपूर्वंमनोर्देवःपितामहः॥ सह्या
द्रिशिखरेरम्येयजनायोद्यतोभवत्॥ सहैवतोपयज्ञसंभा[illegible]नसर्वैर्देवगणैर्वृतः॥५॥ युक्तोहरिह

॥ कार्त्ति० ॥
॥ ४२ ॥

राम्यां च तद्गिरेः शिखरं ययौ ॥ भृग्वाद्यो मुनिगणाः सह तैरस्त्रदैवतैः ॥ तस्य दीक्षावि-
धानाय समाजे चक्रुरायताः ॥ अथ ज्येष्ठां स्वरां पत्नीमाहूयाच भृगुः स्वयं ॥ सा शनैराययौ ता-
वद्भृगुर्विष्णुमुवाच ह ॥ ८ ॥ भृगुरु० ॥ विष्णो स्वरा त्वरा हीना सा नायाति न हि सत्वरं ॥ मुहूर्तोऽतिक्र-
मन्नेव कार्यो दीक्षाविधिः कथं ॥ ९ ॥ विष्णुरुवाच ॥ नो याति चेत्स्वरा शीघ्रं गायत्रीं चैव संगृ-
ह्य ॥ एषा न हि भवेद्युक्ता भार्या किंतु त्वत्कर्मणि ॥ एवमेव हि रुद्रस्य विष्णोर्वाक्यमभून्म-
त ॥ तच्छ्रुत्वा स भृगुर्वाक्यं गायत्रीं ब्रह्मणस्तदा ॥ ११ ॥ निवेश्य दक्षिणे भागे दीक्षाविधिम-
थाकरोत् ॥ यावद्दीक्षाविधेश्चक्रुर्विधेस्तस्य मुनीश्वराः ॥ तावदभ्याययौ तत्र स्वरा यज्ञस्थलं
नृप ॥ ततः सा दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह ॥ १३ ॥ सपत्नीर्ष्यापरा क्रोधात्तत्स्वरा वचनं ब्र-
वीत् ॥ १४ ॥ स्वरोवाच ॥ अपूज्या यत्र पूज्यन्ते पूज्यानां च व्यतिक्रमः ॥ तत्र त्रीणि भविष्यंति दु-
र्भिक्षं मरणं भयं ॥ १५ ॥ मदासने कनिष्ठेयं भवद्भिः संनिवेशिता ॥ तस्मात्सर्वे जडीभूता नदीरू

॥ ४२ ॥

ताम विष्णपथ ॥१९॥ इयं च दक्षिणे भागे शुद्धविष्णपदासने ॥ तस्माल्लोके रहस्यैपेहि तनुरूपा तु नि-
म्नगा ॥ ॥ नारद उ० ॥ ततो हाहाकृताः सर्वे शिवविष्णुपुरोगमाः ॥ प्रणम्य दंडवद्भूमौ स्वरालब्ध-
विजितप्रभुः ॥२०॥ देवा ऊचुः ॥ देवि सर्वेवयं त्राता उत्साघापित्वयाद्युना ॥ तदो सर्वे नदी-
भूता मविष्णावोत्र निम्नगाः ॥२१॥ तदा लोककर्तुं ध्येतत् विनश्चिष्यति निश्चिता ॥ अपि के कृ-
कृतः स्वस्माच्छापो यं विनिवर्त्यतां ॥२२॥ स्वपेर्वोच ॥ नार्चितो हि गणाध्यक्षो यज्ञादौ
पत्नुमेतमाः ॥ तस्माद्विघ्नं समुत्पन्नं क्रोधजनितं खलु ॥२३॥ नापि मद्वचनं ह्येतदसत्यं ख-
लु जायते ॥ तस्मात्त्वं श्रीजडीभूता पूर्वं भवतनिम्नगाः ॥२४॥ आवामपि समपल्योश्च स्थाने
मैव हि निम्नगोभविष्णमोत्र भेदे वो पश्चिमाभिमुखे सदा ॥२५॥ जडीभूता भवं ल घः सा-
गौरेव तदा नृप ॥ तत्र विष्णुर् महातेजा [illegible] ब्रह्मा ककुद्मिनी चैव बन्ध-
भुष्टपृथक् पृथक् ॥ देवाः स्थानपितानेशा [illegible] स्वस्थानं वै त्रिदिवं प्रभुः ॥२७॥ सह्याद्रिः शिख

रिन्यस्ताः पृथगास्वंश्च निम्नगाः ॥ देवांशाः पूर्ववाहिन्यो बभूवुः पश्चिमावहाः ॥ तत्कल्पांशाः
पृथकृतत्रेज्ञातशोथसहस्रशः ॥ गायत्री वस्वशाचैव पश्चिमाभिर्मुखे तदा ॥२९॥ योगेनैव ब्राभ
वंनद्यौ सावित्री तित्पथांगते ॥ ब्रह्मणास्थापितौ तत्र यतो हरिहरावुभौ ॥ महाबलातिबलिनौ ना
म्ना देवौ बभूवतुः ॥ तयोर्नद्योस्तु माहात्म्यं नाहं वक्तुं क्षमो न्नणां ॥ ययोर्ब्रह्मादयो देवाः स्वां
शैः तिष्ठंति सर्वदा ॥ कृष्णोद्भवं पापहरं परं यः शृणोति चश्रावयते च भक्त्या ॥ स्यात्तस्य पुंसः
सकलं फलं यत्तद्दर्शनस्नानगमोद्भवं स्मृतं ॥३२॥ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये
चतुर्विंशोऽध्यायः ॥ ॥ श्रीकृष्ण उं० ॥ ॥ इति तद्वचनं श्रुत्वा पृथुर्विस्मितमानसः ॥ संपू
ज्य नारदं भक्त्या विससर्ज तदाप्रिये ॥ १ ॥ तस्माद्व्रतत्रयं ह्येतन्ममातीवप्रियंकरं ॥ माघका
र्त्तिकयोश्चैव तथा चैकादशीव्रतं ॥ वनस्पतीनां तुलसी मासानां कार्त्तिकप्रियः ॥ एकादश
व्रतानां च क्षेत्राणां द्वारकामम ॥ एतेषां सेवनं यस्तु कुरुते नियतेंद्रियः ॥ स मे वल्लभतो याति

न तथा जपनादिभिः ॥ पापेभ्यो न भयं तेन कर्त्तव्यं नियमादपि ॥ एतेषां सेवनं कांते कुर्वतां मत्प्रसादतः ॥ १५ ॥ सत्योवाच ॥ आश्चर्यकरं नाथ यत्त्वया कथितं मम ॥ परदत्तेन पुण्येन कलहा मुक्तिमागता ॥ मास एवं प्रभावोयं कार्त्तिकस्ते प्रियंकरः ॥ स्वामिद्रोहादिपापानि स्नानं पुण्यैर्गतानि यत् ॥ दत्तं चेल्लभ्यते पुण्यं पापानि च तथा नरैः ॥ प्राप्यंते कर्मणा येन तद्यथावन्निशामय ९ देशग्रामंकुलानि स्युर्भागिनो न जिकृतादिषु ॥ कलौ तु केवलं कर्त्ता फलभुक् पुण्यपापयोः ॥ १० ॥ अकृतेपि हि संसर्गे व्यवस्थेयमुदाहृता ॥ संसर्गात्पुण्यपापानि तथा यांति निबोध मे ॥ ११ ॥ एकत्रैमैथुनाध्यानादेकपात्रे च भोजनात् ॥ फलार्द्धं प्राप्नुयान्मर्त्यो यथावत्पुण्यपापयोः ॥ अध्यापनाद्याजनाद्वा एकपंक्त्यासनादपि ॥ तुर्यांशं पुण्यपापानां सद्यः प्राप्नोति मानवः ॥ १२ दर्शनश्रवणाभ्यां च मनोध्यानात्तथैव च ॥ परस्य पुण्यपापानां शतांशं प्राप्नुयान्नरः ॥ १४ ॥ परस्यनिंदापैशुन्यं धिक्कारं च करोति यः ॥ तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः ॥ १५ ॥ कुर्वतः पुण्यकर्माणि सेवां यः कुरुते परः ॥ पत्नीभृतकशिष्येभ्यो यद्यन्यः कोपि म

नवः ॥१६॥ तस्यसेवानुरूपेणसपुण्यफलभाग्भवेत् ॥ एकपंक्त्यश्नतांयस्तुलंघयेत्परिवेष
येत् ॥१७॥ तस्यपुण्यषडंगंचलभेद्यस्त्वविलंघितः ॥ स्नानसंध्यादिकंकुर्वन्यःस्पृशेत्तंप्र
भाषते ॥ तत्सुकर्मपुण्यषष्ठांशंदद्यात्तस्मैसुनिश्चितं ॥१८॥ धर्मोद्देशेनयोद्रव्यंपरंयोयाचयेन्न
रः ॥ तस्यकर्मोद्भवंपुण्यंधनदस्याप्नुयात्फलं ॥१९॥ अपहृत्यपरद्रव्यंपुण्यंकर्मकरोतियः
कर्मकृत्पापभाक्तत्रधनिनस्तद्भवंफलं ॥२०॥ नापनुत्यऋणंयस्तुपरस्यम्रियतेनरः ॥ धनीस
त्पुण्यमादत्तेस्वधनेस्यानुरूपतः ॥२१॥ बुद्धिदत्त्वनुमंताचयश्चोपकरणप्रदः ॥ स्थलस्थलस्तच्छा
विषष्ठांशंप्राप्नुयात्पुण्यपापयोः ॥२२॥ प्रजाभ्यःपुण्यपापानांराजाषष्ठांशमुद्धरेत् ॥ शिष्या
द्गुरुस्त्रियाभर्तापितापुत्रात्तथैवच ॥ स्वपतेपिहिपुण्यस्ययोषिद्धर्मभवाप्नुयात् ॥ चेतस्यानुज्ञ
ताशुश्रूषद्धर्तेतुष्टिकारिणी ॥ परहस्तेनदातव्यंकर्तव्यंपुण्यकर्मणः ॥ विनाप्यतत्कृपुत्राभ्यो
कर्त्ताषष्ठांशमुद्धरेत् ॥ आलसेनापिवापरस्यादियादृसेवांनकारयेत् ॥ इत्थंत्यद्दत्तांन्यपि

पुण्यपापान्यायांति सद्यः परसंचितानि ॥ शृणुयश्चास्मिन्नितिहासमग्र्यं पुराभवं पुण्यमतिप्र
दं च २९ ॥ ॥ इति पद्मपुराणे कार्तिकमाहात्म्ये पंचविंशोध्यायः ॥ ॥ नारद उ० ॥ पुरावंती पुराव
सी विप्र आसीद्धनेश्वरः ॥ ब्रह्मकर्मपरित्यागी पापनिष्ठः सुदुर्मतिः ॥ १ रसकंबलचर्माद्यैः सं
सक्तानृतवृत्तिकः ॥ अपि वेश्यासुरापानद्यूतसंसक्तमानसः ॥ २ देशाद्देशांतरं गछन् क्रयविक्रय
कारणात् ॥ माहिष्मतीं पुरीमागात्कदाचित्स धनेश्वरः ब्रह्मकर्मपरित्यागी माहिषैर्लालिता पूर्वं त
स्मान्माहिष्मती स्मृता ॥ यस्यां च बहुदा भाति नर्मदा पापनाशिनी कार्तिकव्रतिनस्तत्र नानाग्रा
मगता वसन् ॥ तां तद्दृष्ट्वा विक्रयं कुर्वन्मासमेकं मुदा सह ॥ स नित्यं नर्मदातीरे भ्रमन् विक्रयकार
णात् ॥ ददर्श ब्राह्मणान्स्नानजपदेवार्चने रतान् ॥ कांश्चित्पुराणं पठतः कांश्चिद्विष्णुव्रते रतान् ॥
नृत्यगायनवादित्रविष्णुस्तवनतत्परान् ॥ कांश्चिन्मुद्रांकितान्विष्णोर्मालातुलसिधारिणः ॥ दद
र्श कौतुकाविष्टस्तत्र तत्र धनेश्वरः ॥ नित्यं परिभ्रमंस्तत्र दर्शनस्पर्शभाषणैः ॥ वैष्णवानां तथा वि

होर्नाम आवादिष्टं स्मरंन्‌॥ एवं मासस्थितः सोथ कार्त्तिकोद्यापनं विधिं॥ क्रियमाणं ददर्शासौ प्री
त्यर्थं त्रिपुरद्विषः॥ त्रिपुराणां कृतो दाहो यतस्तस्यां निशि वेन तु॥ अतस्तत्क्रियते तस्यां तिथौ भक्तैर्महोत्स
वः॥ ममरुद्रस्य यः कश्चिदंतरं परिकल्पयेत्‌॥ तस्य पुण्याः क्रियाः सर्वा निःफलाः स्युर्न संशयः॥ त
त्र न स्यादिकंपनरपन्‌ ब्रह्मामसधनेश्वरः॥ तावत्तु हस्ताद्धि नादस्ता विह्वलः स पपात ह॥ जनास्तं पतितं
वीक्ष्य परिवव्रुः कृपान्विताः॥ तुलसीमिश्रितैस्तोयैस्तन्मुखं सिषिचुस्तदा॥१६॥ अथ देहं परित्यज्य
बध्वा च यमकिंकराः॥ ताडयमानं कशाघातैर्निन्युः संयमिनीं रुषा॥१७॥ चित्रगुप्तस्ततो दृष्ट्वा नि
र्भर्त्स्य कथयत्तदा॥ यमाय तेन बालत्वं कर्मयत्तु दुष्कृतं कृतं॥१८॥ चित्रगुप्त उ०॥ नैवास्य दृश्य
ते किंचिदाबाल्यं सुकृतं क्वचित्‌॥ दुष्कृतं दृश्यते वत्स वर्षे मापि न भास्वरे॥ पापमूर्तिरयं दुष्टः के
वलं दृश्यते विभो॥ तस्मादाकल्पमर्यादं निरयं पच्यतामयं॥२०॥ श्रीकृष्ण उ०॥ निशम्येत्थं व
चः क्रोधाद्यमः प्राह तत्र किंकरान्‌॥ दर्शयंत्वालनेरूपं कालाग्निसदृशं प्रभुः॥२१॥ यम उ०॥

सोप्रेतपतयस्तेन वध्यमानं स्वकिंकरैः ॥ कुंभीपाके क्षिपंस्तूष्णु तैलं कथ न्नाह्निते ॥२५॥ यावत् क्षि
प्रक्षू तत्रासौ तावच्छीतलतां ययौ ॥ कुंभीपाकस्थितो वन्हिः प्रल्हादक्षेपणासुरा ॥ तं दृष्ट्वा महदाश्चर्यं
प्रेतपो विस्मयान्वितः ॥ वेगादागत्य तत्सर्वं यमायावेदयत्तदा ॥२६॥ तावदभ्यागमत्तत्र नारदः प्र
हसंस्त्वरं ॥ यमेन पूजितः सम्यक् कृतं दृष्ट्वा वाक्यमब्रवीत् ॥२७॥ नारद उ० ॥ नैवान्यं निरयान्नू
भोक्तुं क्षमः सविस्रनंदन ॥ यस्मादेतेस्य संजातं कर्मयन्निरयापहं ॥२८॥ यः पुण्यकर्मणां कुर्या
द्दर्शं दर्शनस्पर्शनादिकं ॥ तत्षडंशमवाप्नोति पुण्यस्य नियतं नरः ॥२९॥ सख्यं च कृतवान्नेम
स कार्त्तिकव्रतिभिर्यम ॥ तस्मात्पुण्यस्य षष्ठांशभागी भवतु निश्चितं परिचर्याकरः षण्मासं हण
व्रत पुण्यभाक् ॥ अतोस्योर्जव्रतोद्भूतपुण्यसंख्या न विद्यते ॥ कार्त्तिकव्रतिनां पुंसां पातकानि म
हांत्यपि ॥ नाशयत्येव सर्वाणि विष्णुः संड कृव तत्क्षणः ॥ अथैतेच नार्मदैस्तोयैस्त्क्कसीभिश्च तै

का॰ ति॰
८६

रयं ॥ वैष्णवैः स्नापितो विष्णोर्नामसंश्रावितोपि च ॥ तस्मान्निर्गतपापोयं सद्गतिं प्राप्नुमर्हति ॥ वैष्ण
वानुगृहीतोसौ निरये नैव पच्यतां ॥ ३४ ॥ आर्द्रैः शुष्कैस्तथा पापैर्निरयो भोगसंज्ञितो ॥ प्राप्यते
सुकृतैस्तद्वत्स्वर्गःसंनिहितस्तथा ॥ ३५ ॥ तस्मादकामपुण्यो हि वक्ष्ययोनिस्थितो ह्ययं ॥ विलोक्य
निरयान्सर्वान्पापभोगप्रदान्सदा ॥ ३६ ॥ ॥ श्रीकृष्णउ० ॥ इत्युक्ते भगवति नारदे स सौरिस्तदा
कृष्यवत्ता विबुद्धतत्सुकर्मी ॥ तं विप्रं पुरस्नयत्स्वकिंकरैश्च तान्सर्वान्निरयगुणान्प्रदर्शयिष्य
न् ॥ ३८ ॥ इति कार्तिकमाहात्म्ये षड्विंशोध्यायः ॥ ॥ श्रीकृष्णउ० ॥ ॥ नारदस्य वचः श्रुत्वा सत
दा प्रेतपोब्रवीत् ॥ दर्शयिष्यंश्च तान्सर्वान्यमस्यानुचरस्तदा ॥ प्रेतप उ० ॥ पश्येमान्निरयान्
घोरान्घनेश्वर महाभयान् ॥ येषु पापकरा नित्यं पच्यंते यमकिंकरैः ॥ तप्तबालुकनामोयं निर
यो घोरदर्शनः ॥ यस्मिन्नेते दग्धदेहाः क्रंदते पापकारिणः ॥ २ ॥ अतिथीन्वैश्वदेवांते सु

८६

लक्षामानागतांश्च ये ॥ सृजयंति न वै ते हि पच्यंते स्वेन कर्मणा ॥४॥ गुर्वग्निब्राह्मणान्गाश्च देवानमूर्धाभि-
षिक्तकान् ॥ ताडयंति पदा वै ते दग्धांघ्रैवभावंति ते ॥५॥ षड्डेदा निरयाः प्रोक्ता नानापापैः प्रपद्यते ॥
तथैवांधः तमिस्रोयं ह्यतीवो निरयो महान् ॥ मत्स्यसूचीमुखैर्देहा भिद्यंते स्वेन कर्मणा ॥६॥ क्रिमि-
भिर्घोरवक्त्रैश्च भिद्यंते सर्वदा द्विज ॥ असावपि स्थितः षोढाश्च काकमद्गपक्षिभिः ॥ परमर्मभिदो
मर्त्याः पच्यंते ये सुपापिनः ॥ असिपत्रवनाद्येश्च षड्कारोद्ययं स्थितः ॥ पत्नीपुत्रादिभिर्ये वै वि-
योगं प्रापयंति हि ॥ इष्टैरन्यैरपि नरा पच्यंते त्र नराधमाः ॥ असिपैश्छिद्यमानाश्च वकभीयापका-
यिताः ॥१०॥ पच्यंते पापिनः पन्त्य क्रंदमाना इतस्ततः ॥ अर्गजारव्यो महाघोरश्चतुर्थो निरयो ह्य-
यं ॥११॥ पन्त्य नानाविधैः पापै यावध्य यमकिंकरैः ॥ असावपि हि षड्डेदो वधभेदादिभिः स्थितः ॥ कू-
टशाल्मलिनामानं निरयं पश्य पंचमं ॥१४॥ यत्रांगारकपर्यंकशाल्मल्याघास्थिता नराः ॥ यत्र वो-
टा विपच्यंते यातनाभिरिवेतराः ॥ अभक्ष्यभक्ष्यकामिंदा पैशून्यादिरतारमे ॥ मज्जमानावध्य

का॰मा॰
४७

मानाः क्रंदंते भैरवैरवैः॥ षट्प्रकारो वि गंधाद्यैरसावपि हि संस्थितः॥ कुंभीपाकः स प्रमोयं निरयो घोरदर्शनः॥१७॥ षोढा तैलादिभिर्द्रव्यैर्धनेश्वर विलोकय॥ महापातकिनो यत्र पाच्यंते यमकिंकरैः॥१८॥ बहून्यब्दसहस्राणि येमज्जनविमज्जनैः॥ चत्वारिंशान्मितानेतानधिकान्पश्यैतैरवान्॥१९॥ अकामात्पातकं शुष्कं कामादार्द्रमुदीरितं॥ आर्द्रशुष्कादिभिः पापैर्विप्रकरानवस्थितान्॥२०॥ चतुराशीतिसंख्याकैः पृथक्कृते द्वैरवस्थितान्॥ प्रकीर्त्तिमपांक्तेयं मलिनीकरणं तथा॥ जातिभ्रंशकरं तद्वदुपपातकसंज्ञितं॥ अतिपापं महापापं सप्तधा पातकं स्मृतं॥ एभिः सप्तसु पच्यंते निरयेषु यथाक्रमं॥ कार्तिकव्रतिनां पुंसां संसर्गाद्भयं तव॥ तस्मात्पापचयादेति निर्गता निरयान्खलु॥२१॥ श्रीकृष्ण उ०॥ दर्शयित्वेति निरयान्प्रेतपस्तमथाहरत्॥ धनेश्वरं यक्षलोकं यक्षश्चाभूत्स तत्र ह॥२२॥ धनदस्यानुगः सोयं धनयक्षेति विश्रुतः॥ तदख्यया करोतीर्थमयोध्यायां तु गाधिजः॥ एवंप्रभावः खलु कार्तिकोयं भुक्तिप्रदो मुक्तिकर

४७

ख्यस्मात विहं तस्नेकार्जितपापसंचयान् ब्रतस्य संदर्शनतोपि मुक्तिं ॥ २९ ॥ इति कार्त्तिकमा
हात्म्ये सप्तविंशतिमः ॥ ॥ सूत उवाच ॥ एकदा वासुदेवोपि सत्यया सहितस्तदा ॥ सायंसंध्या
विधिं कर्त्तुं जगाम जननीगृहं ॥ एवं प्रभा[illegible]ये प्रोक्तोयं कार्त्तिकः पापनाशनः ॥ यं
कृत्वा प्राप्यते पुंभिः सांख्योक्यादिचतुष्टयं ॥ [illegible]सुप्रीतिकरोनित्यं भुक्तिमुक्तिफलप्रदः ॥ हरि
जागरणं प्रातःस्नानं तुलसिसेवनं ॥ उद्यापनं दीपदानं ब्रतान्येतानि कार्त्तिके ॥ पंचभिश्च ब्र
तैरेभिः संपूर्णं कार्त्तिकब्रती ॥ फलमाप्नोति यत्प्रोक्तं भुक्तिमुक्तिफलप्रदं ॥ ४ ॥ ऋषय ऊचुः ॥ वि
ष्णुभक्तिश्च कथिता महादेवेन संमिता ॥ कार्त्तिकस्य विधिः सम्यक् सेतिहासो निवेदितः ॥
स्वरूपमेव कर्त्तव्यं पापदुखविनाशनं ॥ मोक्षकामैः कृतं सम्यक् भोगकामैरपापिवा ॥ एवं
स्थिते यथा कश्चिद्दुतैस्तुः संकटे स्थिता ॥ दुर्गारण्ये स्थितो वापि व्याधिभिः परिपीडितः ॥
कथं तेन प्रकर्त्तव्यं कार्त्तिकब्रतकं शुभं ॥ यस्मादनंतफलदं न्याऽयं सर्वथा नरैः ॥ ८ ॥ सूत उ ॥

॥ कार्ति॰ ॥
॥४८॥

एवमापद्गतोयस्तुनरोनित्यंदृढव्रतः॥ कार्तिकव्रतकंनित्यंकृतंतेनयथाभवेत्॥ तत्सर्वंकथयि
ष्येहंशृणुध्वंमुनिपुंगवाः॥ विष्णोःशिवस्यवाकुर्याद्दालयेहरिजागरं॥१०॥ दुर्गारंएयस्थितोय
श्चयदिवापद्गतोभवेत्॥ शिवविष्णुगृहाभावेसर्वदेवालयेष्वपि॥११॥ कुर्यादश्वत्थमूलेतु
तुलसीनांवनेष्वपि॥ विष्णुनामप्रबंधानांगायनंविष्णुसन्निधौ॥१२॥ गोसहस्रप्रदानस्यफ
लमाप्नोतिमानवः॥ वाद्यकृत्पुरुषश्चापिवाजपेयफलंभैवेतलभेत्॥ सर्वतीर्थावगा
होत्थंनर्त्तकःपुण्यमाप्नुयात्॥ सर्वमेतल्लभेतेषांऽव्ययमेवप्रदःपुमान्॥ श्रवणाद्दर्शनाद्वा
पितत्सर्वंशममवाप्नुयात्॥ आपद्गतोयदाकालंस्नानार्चनलभेत्पुनः॥ व्याधितोपिनरःकु
र्यात्स्नानाभिमार्जनं॥ उद्यापनविधिंकर्तुमशक्तोपिव्रतेस्थितः॥ ब्राह्मणान्भोजयेच्छक्त्याव्र
तसंपूर्त्तिहेतवे॥१४॥ अव्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणाभुवि॥ तत्सेतुष्टाससंतुष्टः
सर्वदास्यान्नसंशयः॥ अशक्तोदीपदानेतुपरदीपप्रबोधयेत्॥ तेषांवारक्षणंकुर्या

द्विलो

॥४८

ताद्विप्रः प्रयत्नतः ॥१९॥ अभावे तुलसीनां च पूजयेद्विजसत्तम ॥ यस्मात्संनिहितो विष्णुः
स्तन्मूले धेवसर्वदा ॥ सर्वाभावे ब्रतीकुर्याद्ब्राह्मणानां वामनृपि ॥ सेवानश्वत्थवटयोर्व्रत सं
पूर्णहेतवे ॥२२॥ ऋषय ऊचुः ॥ कथंत्वयाश्वत्थवटौ गो ब्राह्मणासमौ कृतौ ॥ सर्वेभ्यो
पितरुभ्यश्च तस्मात्सूत्पतरौ कृतौ ॥२३॥ सूत उवाच ॥ अश्वत्थरूपी भगवान् विष्णुरेव न सं
शयः ॥ रुद्ररूपीवटस्तद्वत्पलाशो ब्रह्मरूपधृक् ॥ दर्शनस्पर्शनं सेवा तेषां पापहरा स्मृता
दुःखापद्व्याधिदुष्टानां विनाशं कुरुते ध्रुवं ॥२५॥ ऋषय ऊचुः ॥ कस्माद्वृक्षत्वमापन्ना ब्रह्मा
विष्णुमहेश्वराः ॥ एतत्कथय धर्मज्ञ महानत्रास्ति संशयः ॥२६॥ सूत उवाच ॥ पार्वतीशिवयो
र्देवैः सुरतं कुर्वतोः किल ॥ अग्निं ब्राह्मणरूपेण प्रेष्य विघ्नं कृतं पुरा ॥ ततस्तत्र पार्वती क्रु
द्धा शशाप त्रिदिवौकसः ॥ रत्युत्सवसुखभ्रंशात्कंपमाना रुषा तदा ॥२८॥ ॥पार्वत्युः

क्रिमिकीटादयो ह्येव जानंति सुरते सुखं ॥ तद्विघ्नकरणाद्देवा युद्धीजत्वमवाप्स्यथ ॥ २९ ॥ सू
त उ० ॥ एवं सा पार्वती देवी ह्यशपत्क्रुद्धमानसा ॥ तस्माद्वृक्षत्वमापन्नाः सर्वे देवगणाः किल ।
तस्मादिमौ विष्णुमहेश्वराशुभौ ब्रह्मन्वतुबोधिवटौ मुनीश्वराः ॥ अर्कादिवारेषु च बोधि
वृक्षो ह्यस्पृश्यतामेति शनिं विनैव ॥ ३१ ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये एकत्रिं
शत्तमोध्यायः ॥ ऋषय ऊचुः ॥ अस्पृश्यत्वं कथं यातस्तत बोधितरुः स्वयं ॥ स्पृश्य
त्वं च कथं प्राप्तस्तथायं शनिवासरे ॥ १ ॥ सूत उ० ॥ समुद्रमथनायानि रत्नान्यापुः
सुरोत्तमाः ॥ श्रियं च कौस्तुभं ते वै विष्णवे प्रददुः सुराः ॥ २ ॥ यावदंगीचकारासौ लक्ष्मीं भा
र्यार्थमात्मनः ॥ तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनं ॥ ३ ॥ लक्ष्मी रु० ॥ असंस्कृ
त्य कथं ज्येष्ठां कनिष्ठा परिणीयते ॥ तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन ॥ ४ ॥ विवा

चैतन्यमांपश्चादेषधर्मः सनातनः ॥ इतितद्वचनंश्रुत्वासविस्मुलौकपावनः ॥ उद्दालकायमु
नयेसुदीर्घतपसेतदा ॥ आत्मवाक्यानुसारेणतामलक्ष्मींददौकिल ॥ स्वलास्यांमुख्यदत्वा
नोराजतोबिभ्रतीतनुं ॥ ७ ॥ विततांस्वकृनन्पनांरूक्षपिंगशिरोरुहां ॥ समुनिर्विस्मुवाक्यांतांनि
नीकृतवानाश्रमं ॥ ८ ॥ वेदध्वनिसमायुक्तमानयामासधर्मवित् ॥ होमगंधंधसुगंधंध्या. रवे
वेदघोषनिनादितं ॥ आश्रमंचसमालोक्यसयतीतासाब्रवीदिदं ॥ १० ॥ ज्येष्ठोवाच ॥ नहि
वासोनुरूपोयंयतोवेदध्वनिर्मम ॥ नागच्छाम्यहमद्यात्रनयस्याम्यत्रैन्यत्रमांध्रुवं ॥ ॥ उद्दाल
क उ० ॥ कुतोनायासिकिंवात्रवर्त्ततेसंमतंतव ॥ तवयोग्याचवसतिः कात्रवेत्रवदस्वत
त् ॥ १२ ॥ ज्येष्ठोवाच ॥ वेदध्वनिर्भवेयस्मिंन्नतिथीनांचपूजनं ॥ यज्ञदानादिकंयत्रनैवतत्र
वसाम्यहं ॥ १३ ॥ उद्यमीनीतिकुशलोधर्मयुक्तप्रियंवदः ॥ सत्यवादीसद्रतोनैवतत्रवसाम्य
हं ॥ १४ ॥ दिवारात्रौगृहेयत्रदंपत्योःकलहोभवेत् ॥ यत्रागच्छंत्यथिथयस्तस्मिंस्थानेवसाम्यहं ॥

कार्ति०
॥५०॥

दुरोदररता यत्र परद्व्यापहारिणः ॥ परदाररताश्चापि तत्रस्थाने रतिर्मम वृद्धसङ्गेन विप्रा
णां भवेयत्रावमाननं ॥ निष्ठुरं भाषणं यत्र तत्र सम्प्रयासाम्यहं ॥ ८ ॥ सूत उ० ॥ इति तद्वचनं श्रु
त्वा विषण्णवदनो भवत् ॥ उद्दालकः पुनर्वाक्यं स्मृत्वा विष्णोर्नचोचिवान् ॥ लोगल[illegible]घत्र यत्रा
स्य सञ्ज्ञामालोक्य साब्रवीत् ॥ नागच्छामि ततः सोपि भ्रमनूखेदातुरोभवत् ॥ उद्दालकस्ततो वा
क्यं तामलक्ष्मीमुवाच ह ॥ उद्दालक उ० ॥ अश्वत्थवृक्षमूलेस्मिन्नलक्ष्मी क्षीयतां क्षणं ॥ त्वा
गृहस्थानमालोक्य यावेष्यास्याम्यहं पुनः ॥ २१ ॥ सूत उ० ॥ इति तां तत्र संस्थाप्य जगामोद्दा
लकस्तदा ॥ प्रतीक्षती चिरं तत्र यांतं तं न ददर्श सा ॥ तदाहरोदकरुणा भर्तृत्यागेन दुःखिता ।
तदास्या रुदितं लक्ष्मी वैकुंठभुवनेश्रुणोत् ॥ तदा विज्ञापयामास विष्णु शुद्धमानसा ॥ २४ ॥ ॥ ५० ॥
लक्ष्मीरु० ॥ स्वामिन् मद्भगिनी ज्येष्ठा भर्तृत्यागेन दुःखिता ॥ तामाश्वासयितुं याहि कृपाको
पयाहं प्रिया ॥ २५ ॥ सूत उ० ॥ लक्ष्म्या सह ततो विष्णुस्तत्रागच्छत्कृपान्वितः ॥ आश्वासयं

```
[OrderDescription]
,CREATED=22.01.20 16:31
,TRANSFERRED=2020/01/23 at 10:08:58
,PAGES=100
,TYPE=STD
,NAME=S0002627
,Book Name=M-2364-KARTIK MAHATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
```

```
FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
```

```
FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
```

```
FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
```

```
FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
```

```
FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
```

```
FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,
```